# वेदान्तडिण्डिमः

व्याख्याता

श्री.श्री. सच्चिदानन्देन्द्रसरस्वतीभिक्षुः

प्रकाशका :

अध्यात्मप्रकाशकार्यालयः

होलेनरसिपुरः हासन जिल्ला

कर्णाटक - ५७३२११

०८१७५-७३८२०

२००२

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्था

# BACK TO SHANKARA SERIES

*Editor and Commentator :*

**SWAMI SATCHIDANANDENDRA SARASWATI**

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** - सटिप्पणभाष्ययुताः -

The Isa, Kena, Kathaka and Mundaka Upanishads and the Shikshavalli of theTaittiriya, critically edited separately with the Bhashya and Notes.

**आनन्दवल्ली भृगुवल्ली च** - सभाष्या, भाष्यार्थविमर्शिनीसहिता -

Anandavalli and Bhriguvalli with an elaborate original commentary. Contains a critical review of all mis - interpretations as also of objections of adverse schools.

**माण्डूक्यरहस्यविवृतिः**- उपनिषदो गोडपादकारिकाणां च अभिनवा व्याख्या -

This is the first attempt of its kind to present both Gaudapada and S'aṅkara in their true perespective.

**सुगमा** - अध्यासभाष्यस्य नवीनव्याख्या -

A new original sub-commentary on the Adhyasa Bhashya pointing out a straight and smooth way to the essentials of the vedanta method. All later undersirable accretions cleared out of the way.

**सूत्रभाष्यार्थतत्त्वविवेचनी** -

A new commentary on S'aṅkar's Bhashya bringing out the salient features of S'aṅkara's system and its method. Written on the same lines as the Janmadyadhikarana.

*Apply for descriptive catalogue to -*

**ADHYATMA PRAKASHA KARYALAYA**

HOLENARASIPUR (Hassan Dist., Mysore State).

# वेदान्तडिण्डिमः भावबोधिनीसंयुतः

## VEDANTA DINDIMA
### WITH BHAVABODHINI

(Copyrights reserved under the copyright Act 1957)

क्रमांक : २२४

Sl.No. : 224

Published by,
**Adhyātma Prakāsha Kāryālaya**
Holenarsipur - 573211
Hassan District, Karnātaka State
08175-73820
2002

I Edition : 1935
II Edition : 2002

# VEDANTA DINDIMA

(THE DRUM-BEAT OF VEDANTA)
OF
**SRI NRISIMHA SARASWATI**

EDITED WITH A COMMENTARY
BY
**H.H. SRI. SWAMI SATCHIDANDENDRA SARASWATHI SWAMIJI**
(Y.SUBRAHMANYA SHARMA)

# वेदान्तडिण्डिमः

श्रीमन्नृसिंहसरस्वतीतीर्थविरचितः

श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः विरचितया
भावबोधिन्याख्यया व्याख्यया सहितः

PAGES : vi + 70
PRICE : 25/-

Composed at
**Prashanth Enterprises**
B'lore - 28, Ph. : 6764650

Printed at
**Standard Printers**
B'lore - 04, Ph. : 6521527

# PREFACE

The Vedanta Dindima is one of the few booklets that enjoy a widespread influence denied even to the masterpieces in that branch of literature. Among the special features that have contributed to its popularity, must be reckoned, undoubtedly, the characteristic simplicity of its style, and the convincing way in which it demonstrates the identity of **"SAKSHI"** the Witnessing Principle in us and BRAHMAN, the Great Basic Reality of life, whose essence is absolute existence, consciousness, and bliss.

The authorship of this tract is wrapped in obscurity. For reasons stated in the Sanskrit preface, the writer can be identified neither with the commentator of Vedantasara nor with his namesake who has written the polemic Bheda-Dhikkara.

This is the first attempt to present this justly famous work in a form attractive to the beginner in Vedanta. Important various readings have been indicated and two alphabetical Indexes, one of the Slokas and the other of the principal contents, have been also added. An original commentary specially prepared for us by the Editor, is an important adjunct, which, it is hoped, will greatly enhance the value of this edition.

1-2-1935

PUBLISHER

# प्रस्तावना
## (प्रथमसंस्करणस्य)

सुप्रसिद्धमिदं प्रकरणं श्रीमन्नृसिंहसरस्वतीविरचितमिति प्रथा । तत्र कोऽयं नृसिंहसरस्वतीति तु निःसंशयं निश्चेतुं न पार्यते । अयं भेदधिक्कारप्रणेतृत्वेन विद्वन्माननीयादन्य एव, तथा वेदान्तसारव्याख्याकर्तुः सुबोधिनीकारादप्यन्य एव । यतो भेदधिक्कारकृद्धि नरसिंहोपासकः, सुबोधिनीकारश्च कृष्णानन्दशिष्यः इति तदुभयकृतमङ्गलश्लोकाभ्यामवसीयते । वेदान्तडिण्डिमकारस्तु दक्षिणामूर्त्युपासकः । श्रीशङ्करभगवत्पादा एव डिण्डिमकारा इत्यभिप्रायः क्वचिन्मुद्रितपुस्तके दृश्यते । एतदपि प्रकाशकानां तर्कमात्रमिति मन्मतिः ; साधकयुक्तीनामप्रदर्शनात्, उपदेशसाहस्रीप्रमुखेषु भगवत्पादीयत्वेन निर्णीतेषु परिदृश्यमानायाः पद्यशैल्या अत्रत्यायाश्च भेदस्य स्फुटत्वाच्च । तदस्य ग्रन्थकर्तुः कालादिनिर्धारणे प्राक्तन तत्वविमर्शका एव प्रमाणमिति न तत्र किंचिद्वक्तुं शक्नोमि ।।

प्रकरणमिदं मूलमात्रमुत्तरभारते दक्षिणापथे च कृतमुद्रणमपि देवनागरीकर्णाटकादिषु लिपिषु, अशुद्धिबहुलमासीत् । तमिमं ग्रन्थं मुद्रितग्रन्थसाहाय्येनैव यथामति संशोध्य स्वकृत्या भावबोधिन्याख्यया व्याख्यया च संयोजितवानस्मि । यत्र मुद्रितपुस्तकेषु पाठभेदः, अशुद्धिबाहुल्याच्चार्थ-प्रतीतिप्रतिबन्धश्चासीत् तत्र स्वकल्पितमेव पाठं सचिह्नं विनिवेश्य व्याख्यामकारि । तमिमं धाष्टर्यं क्षन्तुमर्हन्ति गुणलुब्धा विपश्चितः । संप्रार्थ्यन्ते च विद्वत्प्रकाण्डा द्वितीयमुद्रणे इतोप्यतिशयेन छात्रगणप्रयोजनकरं यथास्याद्ग्रन्थरत्नमिदं तथा सम्यक्पाठव्याख्यासंस्करणादिसंसूचनेनानुग्राह्यस्त्वयं विदुषामनुचरमिति ।।

भावसंवत्सरे
मार्गशीर्ष ब. १ तिथौ
कल्याणनगर्याम्(१-२-१९३५)

श्री.श्री. सच्चिदानन्देन्द्रसरस्वतीभिक्षुः
(पूर्वाश्रमे - य.सुब्रह्मण्यशर्मा)

## (द्वितीयमुद्रणस्य)

अस्मिन् द्वितीयमुद्रणे न कुत्रापि किञ्चिदपि परिवर्तनमस्ति ।

चित्रभानुसंवत्सरे, मार्गशीर्ष ब. ८ तिथौ
२७.१२.२००२(27-12-2002)

प्रकाशकः

# सङ्केताक्षराणां विवरणम्

| | |
|---|---|
| आ. | (टिप्पण्याम्) आन्ध्रलिपिमयकोशे पाठः |
| ई. | ईशावास्योपनिषदि |
| क. | (टिप्पण्याम्) कर्णाटकलिपिमयकोशे पाठः |
| क. | कठोपनिषदि |
| के. | केनोपनिषदि |
| कै. | कैवल्योपनिषदि |
| गी. | गीतासु |
| छां. | छान्दोग्योपनिषदि |
| तै. | तैतिरीयोपनिषदि |
| तै. आ. | तैत्तिरीयारण्यके |
| दे. | (टिप्पण्याम्) देवनागरीकोशे पाठः |
| ना. | महानारायणोपनिषदि |
| प्र. | प्रश्नोपनिषदि |
| बृ. | बृहदारण्यकोपनिषदि |
| मां. | माण्डूक्योपनिषदि |
| मुं. | मुण्डकोपनिषदि |
| मो.ध. | मोक्षधर्मे – महाभारते |
| वि.पु. | विष्णुपुराणे |
| श्वे. | श्वेताश्वतरोपनिषदि |

----------

# ग्रन्थविभागक्रमः

| | | |
|---|---|---|
| १. | उपक्रमणिका आङ्ग्लभाषामयी | iii |
| २. | प्रस्तावना | iv |
| ३. | सङ्केताक्षरणां विवरणम् | v |
| ४. | डिण्डिमग्रन्थः, भावबोधिनीसंवलितः | १-५२ |
| ५. | श्लोकानां वर्णानुक्रमणिका | ५३-५४ |
| ६. | मुख्यविषयाणां वर्णानुक्रमणिका | ५५-५६ |
| ७. | प्रमाणवाक्यानां वर्णानुक्रमणिका | ५६-६५ |
| ८. | प्रकाशिताः संस्कृतग्रन्थाः | ६५-७० |

------

ॐ

# वेदान्तडिण्डिमः

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिसंज्ञितम् ॥ १ ॥

## अथ भावबोधिनीव्याख्या प्रारभ्यते

ईशानः सर्वविद्यानामीश्वरात्माऽखिलाऽत्मनाम् ।
वेदान्तडिण्डिमव्याख्यामनुगृह्णातु शङ्करः ॥

**अथ** ग्रन्थकारः प्रारिप्सितस्य वेदान्तडिण्डिमाख्यस्य प्रकरणस्य परब्रह्मविषयकत्वेन निर्विघ्नपरिसमाप्तिप्रसिद्धिगमनादौ शङ्काभावेऽपि शिष्टाचारपरिपालनार्थं शिष्यशिक्षार्थं च कृतं मङ्गलं ग्रन्थादौ निबध्नाति **वेदान्तडिण्डिमा** इति । वेदान्ताः उपनिषद्वचनानि; त एव डिण्डिमाः घोषणाय वाद्यविशेषाः, यत् तत्त्वं परब्रह्मरूपम्, उद्घोषयन्ति उच्चैर्घोषयन्ति, तात्पर्येण प्रतिपादयन्तीति यावत् । तत् दक्षिणामूर्तिसंज्ञितं तेजः पुरस्तादास्ताम् । तत्तेजः सूर्यादीनामपि भासकत्वेन अनितरसाधारणप्रकाशं वस्तु । **दक्षिणा-मूर्तिसंज्ञितम्** । दक्षिणा दक्षिणदिगभिमुखा मूर्तिर्विग्रहो यस्य शिवस्य सोऽयं दक्षिणामूर्तिः । सनकादीनुपदेष्टुं यदा आविरासीत् परमशिवः स तदा दक्षिणाशाभिमुखोऽभूदिति तदानींतनो लीलाविग्रहो दक्षिणामूर्तिसंज्ञया प्रसिद्ध आसीत् । वेदान्तेषु यत्प्रतिपादितं निराकारं निर्गुणं मनोवागगोचरं ब्रह्म, तदेव उपासकानुग्रहार्थं स्वीकृतलीलाविग्रहं सत् साकारं सगुणं मनोवाग्गोचरं च

भवतीत्यभिप्रायेण 'दक्षिणामूर्तिसंज्ञितम्' इत्युक्तम् । तदीदृशं चैतन्यप्रकाशं वस्तु पुरस्तादास्ताम्, स्वरूपेण अगोचरमपि सत् दक्षिणामूर्तिरूपेण साक्षात्कृतं भवतु इत्यर्थः । अथवा ग्रन्थकर्तुर्मम मानसे आ ग्रन्थपरिसमाप्त्यनुसन्धानविषयतां प्राप्य अनुगृह्णातु इति प्रार्थना । वेदान्तडिण्डिमाख्यैः श्लोकैर्यत्प्रतिपाद्यते परब्रह्मरूपं तत्त्वम्, तद्दक्षिणामूर्तिसंज्ञितपरमेश्वराभिन्नं चैतन्यप्रकाशं वस्तु शिष्याणां साक्षात्काराय भवतु इत्याशीर्वादो वा । सर्वथापि वेदान्तडिण्डिमाख्यमिदं प्रकरणमनुसन्धातॄणामधिकारिणां प्रमितिजनकं प्रारभ्यत इति भावगर्भितं मङ्गलवचनमिदम् ॥ १ ॥

अथ तत्त्वविचारार्थं भूमिकामारचयति -

**आत्मानात्मपदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणौ ।**
**ब्रह्मैवात्मा न देहादिरिति वेदान्तडिण्डिमः ॥ २ ॥**

आत्मानात्म० इति । तत्त्वं जिज्ञासुभिः प्रथमम् आत्मानात्मविवेकः कर्तव्यः । आत्मा च अनात्मा च आत्मानात्मानौ । आत्मानात्मानौ च तौ पदार्थौ च आत्मानात्मपदार्थौ । एवं उत्तरेषु अपि श्लोकेषु 'ज्ञानाज्ञानपदार्थौ' इत्यादीनां विग्रहो ज्ञेयः । 'आत्मानात्मपदार्थौ द्वौ' इति पाठे तु आत्मा अनात्मा चेति द्वौ पदार्थौ इति अध्याहारेण संबन्धः कथनीयः । आत्मानात्मरूपौ पदार्थौ कथं विवेचनीयौ ? तत्राह - भोक्तृभोग्यत्वलक्षणौ इति । आत्मनो भोक्तृत्वं नाम अस्मत्प्रत्ययगोचरत्वम्, 'अहम्' इत्येवंग्राह्यत्वम् । अनात्मनो भोग्यत्वं च ममप्रत्ययगोचरत्वम् । एते भोक्तृभोग्यत्वे आत्मानात्मनोर्लक्षणे भवतः । तत्र ब्रह्मैवात्मा, न देहादिः । देहादीनां 'मम देहः', 'मम प्राणाः', 'ममेन्द्रियाणि', 'ममान्तःकरणम्' इत्येवं सर्वत्र ममबुद्धिगोचरत्वात् । यद्यपि 'ममात्मा' इत्यपि भवति क्वचिद्व्यवहारः, तथापि गौणस्तत्र प्रयोगः । 'मम देहः' इत्यादौ देहादेरिव आत्मनः सकाशाद्भिन्नस्य आत्मनोऽभावादिति द्रष्टव्यम् । इति वेदान्तडिण्डिमः । इत्येवं वेदान्ता उद्घोषयन्ति । यथा 'अन्योऽन्तर आत्मा प्राणमयः' (तै. २-२), 'अन्योऽन्तर आत्मा मनोमयः' (तै. २-३), 'अन्योऽन्तर आत्मा विज्ञानमयः'

(तै. २-४), 'अन्योऽन्तर आत्माऽऽनन्दमयः' (तै. २-५), 'एष त आत्मा' (बृ. ३-७-२३) इत्यादय इत्यभिप्रायः ॥ २ ॥

उक्तविवेकज्ञानेन प्रयोजनमाह -

**ज्ञानाज्ञानपदार्थौ[1] द्वावात्मनो बन्धमुक्तिदौ ।**
**ज्ञानं मुक्तिर्निबन्धोऽन्यदिति[2] वेदान्तडिण्डिमः ॥ ३ ॥**

ज्ञानाज्ञान० इति । आत्मानात्मनोः स्वरूपनिर्धारणं ज्ञानपदार्थः । तयोरविवेकेन अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्मांश्चाध्यारोप्य 'अहं' 'मम' इति व्यवहारप्रवर्तनी बुद्धिरज्ञानपदार्थः । ज्ञानम्, विद्या, सम्यज्ज्ञानम् इति पर्यायाः । अज्ञानम्, अविद्या, मिथ्याज्ञानम्, मिथ्याप्रत्ययः, अध्यासः, भ्रान्तिरिति च पर्यायाः । तावेतौ पदार्थौ आत्मनो बन्धमुक्तिदौ । कथम् ? ज्ञानं मुक्तिः- ज्ञानान्मुक्तिर्भवतीत्यर्थः । तथा, अन्यदज्ञानं निबन्धः । अज्ञानात् संसरणम् भवतीत्यर्थः । तत्त्वाज्ञानमेव बन्धो ज्ञानमेव च मोक्ष इत्ययमर्थोऽपि वेदान्तेषु घुष्यत इत्याह - इति **वेदान्तडिण्डिमः** इति । 'तरति शोकमात्मवित्'(छा. ७-१-३), 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वे. ६-१३), तमेव विदित्वाऽतिमृत्युमेति' (श्वे. ६-१५), 'असुर्या नाम ते लोकाः' (ई. ३), अनीशया शोचति मुह्यमानः' (मु. ३-१-२), 'अविद्यायामन्तरे वर्तमानाः' (क. १-२-५ ; मु. १-२-८)- इत्यादिश्रुतिभ्यः ॥ ३ ॥

आत्मानात्मपदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणावित्युक्तम् । आत्मज्ञानाच्च मोक्ष इत्युक्तमतीतानन्तरश्लोके । तत्र क्रियाफलभोक्तृत्वमेव विवक्षितम् आत्मनस्तज्ज्ञानादेव च मोक्षो विवक्षित इति मा भूत्कस्यचिदपि मतिरिति विस्पष्टकथनार्थमाह - ज्ञातृज्ञेयपदार्थौ इति ।

---

1. ज्ञानाज्ञाने पदार्थौ - आ.दे. 2. ज्ञानान्मुक्तिर्निबन्धाऽन्यत्- दे

**ज्ञातृज्ञेयपदार्थौ[1] द्वौ भास्यभासकलक्षणौ ।**
**ज्ञाता ब्रह्म जगज्ज्ञेयमिति वेदान्तडिण्डिमः ॥ ४ ॥**

यद्भास्यते, ज्ञानेन विषयीक्रियते - तज्ज्ञेयम् । यस्तु भासयति, ज्ञानेन विषयीकरोति - स ज्ञाता । ज्ञेयम्, विषय इति पर्यायौ । ज्ञाता, विषयी इति च । यज्जिज्ञासोरात्मतया स्थितं ब्रह्म, तदेव ज्ञातृ विषयि । आत्मनो यज्ज्ञानगोचरभूतम्, तत्सर्वं जगत् ज्ञेयम् विषयः । एवं विषयविषयिविभागो द्रष्टव्य इत्यभिप्रायः । 'नान्योऽतोऽस्ति विज्ञाता' (बृ. ३-७-२३), 'तमेव भान्तमनुभाति सर्वम्' (मु. २-२-१०) इत्यादि - वेदान्तेषु प्रसिद्धमेतदित्यभिप्रायेण आह - इति **वेदान्तडिण्डिम** इति । एतेन देहप्राणेन्द्रियमनांस्यपि विषयकोटावेवान्त-र्भवन्तीत्युक्तं भवति । 'श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः । चक्षुषश्चक्षुः' (के. १-२) इत्यादिश्रुत्या तथावगमात् ॥ ४ ॥

ब्रह्मजगद्रूपौ पदार्थौ द्वावित्युक्तम् । तत्र ब्रह्मज्ञानान्मुक्तिः, जगज्ज्ञानात्तु बन्ध इति कथम् ? तत्राह -

**सुखदुःखपदार्थौ[2] द्वौ प्रियविप्रियकारकौ ।**
**सुखं ब्रह्म जगद्दुःखमिति वेदान्तडिण्डिमः ॥ ५ ॥**

**सुखदुःख०** इति । सुखं ब्रह्म, प्रियकारकत्वात् । जगत् दुःखम्, विप्रियकारकत्वात् । यद्यपि जगति सुखं दुःखं चेत्युभयमप्युपलभ्यते, तथापि जगति प्रियत्वेन कल्पितं वस्तु परिणामविनाशादिना दुःखप्रदमेव भवतीति न तत् परमार्थतः सुखम् । यत एवं **वेदान्तडिण्डिमो** भवति -'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा' (बृ. १-४-८) इति, 'प्रियꣳ रोत्स्यतीति'(बृ.१-४-८), 'अथेतरे दुःखमेवापि यन्ति' (श्वे.३-१०)- इति च ॥

ननु ब्रह्मैव जिज्ञासोरात्मेत्युक्तम् । तन्न युक्तं भाति । आत्मा हि नाम जीवः पर इति च भिद्यते । तथा व्यवहारात् । तत्र परमात्मैव ब्रह्म, न जीवात्मा । तत्राह -

1. ज्ञातृ ज्ञेयं - आ.
2. सुखदुःखे - दे ॥ आ ॥

**समष्टिव्यष्टिरूपौ द्वौ पदार्थौ सर्वसम्मतौ ।**
**समष्टिरीश्वरो व्यष्टिर्जीवो वेदान्तडिण्डिमः ॥ ६ ॥**

**समष्टिव्यष्टि०** इति । नायं दोषः । समष्टिव्यष्ट्युपाधिभेदेन भेदव्यवहारोपपत्तेः । यथा व्यष्ट्यभिप्रायेण वृक्षः इति व्यपदेशः समष्ट्यभिप्रायेण च 'वनम्' इति । एवमेकस्यैव चैतन्यस्य नामरूपात्मकमायासमष्ट्यभिप्रायेण ईश्वर इति, नामरूपकृतकार्यकरणव्यष्ट्यभिप्रायेण जीवाः इति च व्यपदेशो भवति । यथा च घटरूपोपाधिवशात् घटाकाशा भिन्ना इव, महाकाशरूपेण पुनः एकैवाकाशः ; एवमिहापि भविष्यति । तत्र जीवस्य स्वरूपभूतं चैतन्यमेव समष्ट्युपाध्यपेक्षया ईश्वर इत्युच्यत इति न किञ्चिदपि हीनम् । इति वेदान्तडिण्डिमः - 'तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः' (बृ २-५-१५), 'रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति' (बृ.२-५-१९) इति च श्रुतेः । यथा चेदं तथोपरिष्टाद्दर्शयिष्यते ॥ ६ ॥

अथ वेदे ब्रह्मज्ञानमुक्तम्, कर्मोपासने च । तत्र ज्ञानमेव किमित्येष्टव्यं परमपुरुषार्थं प्रति, न कर्म, उपासनं वा ? तत्रोत्तरं वक्तुमारभते । अत्र श्लोके ज्ञानकर्मणोः स्वरूपतो भेदमाह-

**ज्ञानकर्मपदार्थौ[1] द्वौ वस्तुकर्त्रात्मतन्त्रकौ ।**
**ज्ञानान्मोक्षो न कर्मभ्य इति वेदान्तडिण्डिमः ॥७॥**

**ज्ञानकर्म०** इति । यद्यपि वेदे ज्ञानं कर्म चेत्युभयमुक्तं, अतो न विशेषः, तथापि ज्ञानकर्माख्यौ पदार्थौ परस्परविलक्षणौ स्तः । कथम् ? ज्ञानं वस्तुतन्त्रम्; कर्म तु कर्त्रात्मतन्त्रम् । तद्यथा अश्वेन गच्छति, पद्भ्याम् वा गच्छति, अन्यथा वा गच्छति, न वा गच्छतीत्येवं कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं कर्म । अतस्तत्

---

1. ज्ञानं कर्म - आ.

पुरुषतन्त्रम्, कर्तृपुरुषाधीनस्तस्यात्मलाभो लोके वेदे च। वस्तुयाथार्थ्यज्ञानं तु न पुरुषतन्त्रम्, किं तर्हि वस्तुतन्त्रमेव । तद्यथा - प्रत्यक्षविषये रज्जौ रज्जुबुद्धिः प्रत्यक्षविषयरज्ज्वधीना । न तु पुरुषबुद्ध्यधीना । एवं वेदान्तविहितात्मबुद्धिरपि भवति । तत्र संसारबन्धस्य मिथ्याज्ञानकृतत्वात् सम्यग्ज्ञानकृत एव स्यान्मोक्षो न कर्मकृतः । न हि रज्जौ मिथ्याबुद्धिकृतः सर्पः कर्मणा व्यपनीयते । तस्मात् वेदोक्तत्वसाम्येऽपि कर्मज्ञानयोः, ज्ञानादेव मोक्षो न तु कर्मणेति सिद्धम् । तथा च **वेदान्तडिण्डिमः** - 'नास्त्यकृतः कृतेन' (मु. १-२-१२), 'अन्यत्र धर्मादन्यत्राधर्मात्' (क. १-२-१४), 'अमृतत्वस्य तु नाशास्ति वित्तेनेति' (बृ. २-४-२), 'तमेवं विद्वानमृत इह भवति' (तै. आ. ३-३९) इत्यादि। उपासनाया अपि कर्त्रात्मतन्त्रत्वात् कर्मशब्देनैवात्र ग्रहणम्। तथा च श्रुतिः - 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १-५) इति ॥ ७॥

तच्च ब्रह्मज्ञानं श्रवणमनननिदिध्यासनाख्यसाधनत्रितयलभ्यम्। तस्मादाह-

**श्रोतव्याश्राव्यरूपौ द्वौ पदार्थौ सुखदुःखदौ ।**
**श्रोतव्यं[1] ब्रह्म नैवान्यदिति वेदान्तडिण्डिमः ॥ ८ ॥**

**श्रोतव्य०** इति ॥ लोके श्रोतव्याश्रोतव्यरूपौ द्वौ पदार्थौ स्तः । यस्य श्रवणात्सुखं भवति तच्छ्रोतव्यम् । यस्य तु श्रवणाद्दुःखं भवति तदश्राव्यम् । तत्र ब्रह्मणः श्रवणं सुखदम्, जगद्विषयकं तु दुःखदम् । अभिहितं हि प्रागेव ब्रह्मणः सुखरूपत्वं जगतो दुःखरूपत्वं च 'सुखदुःखपदार्थौ द्वौ' (५) इत्यनेन। तदनूद्य इह निर्धार्यते - श्रोतव्यं ब्रह्मैव, नान्यत् तद्भिन्नं जगदिति ॥ ८॥

तथा **चिन्त्याचिन्त्यपदार्थौ** द्वौ ।

**चिन्त्याचिन्त्यपदार्थौ[2] द्वौ विश्रान्तिश्रान्तिदायकौ ।**
**चिन्त्यं ब्रह्म परं नान्यदिति वेदान्तडिण्डिमः ॥ ९ ॥**

यस्य चिन्तनेन विश्रान्तिर्भवति, तच्चिन्त्यं मन्तव्यम् । यस्य तु चिन्तनेन

1. आत्मा वा अरे द्रष्टव्यः श्रोतव्यः --- (बृ.२-४-५)

2. चिन्त्याचिन्त्ये - आ.दे. ॥

श्रान्तिः, श्रमो भवति मनसः, तन्न चिन्तनीयम् । एवं स्थिते परं ब्रह्मैव चिन्त्यम्, विश्रान्तिदायकत्वात् । तदन्यत्तु न किमपि चिन्त्यम्, श्रान्तिदायकत्वात् । 'पराचः कामाननुयन्ति बालाः' (क.२-१-२) 'तस्येन्द्रियाण्यवश्यानि' (क.१-३-५) इति च श्रुतेः ॥ ९ ॥

तथा निदिध्यासितव्यमपि ब्रह्मैवेत्याह -

**ध्येयाध्येयपदार्थौ द्वौ धीसमाध्यसमाधिदौ ।**
**ध्यातव्यं ब्रह्म नैवान्यदिति वेदान्तडिण्डिमः ॥१०॥**

ध्येयाध्येय० इति ॥ यस्य ध्यानेन धीः समाहिता भवति तद् ध्येयम् । यस्य तु ध्यानेन धीः असमाहिता भवति, विक्षिप्ता भवति, तन्न ध्येयम् । इति हि ध्येयाध्येयपदार्थविवेकः । तत्रैवं सति, ब्रह्मैव ध्येयम् समाधानकरत्वात् । विषयध्यानं तु न कर्तव्यम्, सङ्गकामक्रोधादिजनकत्वेन धीविक्षेपकरत्वात् । इति उद्घोषयति वेदान्तडिण्डिमः- 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथा- मृतस्यैष सेतुः' (मु. २-२-५), 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत्' (बृ. ४-४-२१) इत्यादयः श्रुतयः । तस्माद् ब्रह्मैव श्रोतव्यं मन्तव्यं निदिध्यासितव्यं चेति स्थितम्, 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इत्यादिश्रुतिभ्यः ॥ १० ॥

ज्ञानादेव मोक्षो न कर्मभ्य इत्युक्तम् (७) । ज्ञानसाधनानि च श्रवणमनननिदिध्यासनानि दर्शितानि । तत्रैवं शङ्कयेत - न ज्ञानं केवलं मोक्षसाधनम्, किं तु उत्तमाश्रमवासयोगादिसाधनाऽनुष्ठानापेक्षमेव इति । अत आह -

**योगिनो भोगिनो वापि त्यागिनो रागिणोऽपि च ।**
**ज्ञानान्मोक्षो न सन्देह इति वेदान्तडिण्डिमः ॥११॥**

योगिन इति । योगो नाम विषयेभ्य इन्द्रियाणि प्रतिनिवर्त्य

चित्तवृत्तिनिरोधनम् । भोगो नाम विषयसुखानुभवः । त्यागः सर्वसङ्गपरिवर्जनम् । रागश्च विषयेषु ममत्वबुद्धिः । नैवं नियन्तुं शक्यते-सर्वसङ्गपरित्यागपूर्वकं तुरीयाश्रमे योगाभ्यासमास्थितवत एव ज्ञानिनो मोक्षप्राप्तिर्नेतरस्येति । किं कारणम् ? योगिनः अनपेक्षिताऽऽश्रमकर्मणोऽपि ज्ञानान्मोक्षो भवति, संवर्तादिवत् । भोगिनो गृहस्थस्यापि शास्त्रीयं कर्म कुर्वत एव ज्ञानान्मोक्षो भवति, श्रीकृष्णादिवत् । त्यागिनः सर्वसङ्गं परित्यक्तवत एकान्तवासिनोऽपि ज्ञानान्मोक्षो भवति, शुकादिवत् । रागिणो राज्यादिसङ्गवतोऽपि ज्ञानान्मोक्षो भवति, जनकादिवत् । सर्वत्र ज्ञानमेव कारणं मोक्षस्य, न तु वर्णाश्रमादि बहिरुपाधिरिति भावः । तथा च वेदान्तडिण्डिमः - 'ब्रह्मविदाप्नोति परम्' (तै. २-१) इति ॥

यद्यपि ज्ञानिनो न रागादयः संभवन्ति, अविद्यारागविमुक्तस्यैव ज्ञानोदयात् ; तथापि पराध्यारोपिताः ते संभवन्तीत्यत उक्तम् 'रागिणोऽपि वा' इति, ज्ञानस्य स्वफलवितरणे निरङ्कुशसामर्थ्यप्रदर्शनार्थम् इति ध्येयम् ॥ ११ ॥

**न वर्णाश्रमसंकेतैर्न कर्मोपासनादिभिः ।**
**ब्रह्मज्ञानं विना मोक्ष इति वेदान्तडिण्डिमः ॥ १२ ॥**

न वर्णाश्रम० इति ॥ वर्णाश्रमेषु मध्ये यत्र कुत्र स्थितस्यापि ज्ञानान्मोक्ष इत्युक्तम् । इदानीं ज्ञानं विना केवलकर्मादिसाधनैर्न मोक्षो भवेदिति प्रतिपाद्यते । न वर्णाश्रमसंकेतैः ब्रह्मक्षत्रवैश्यशूद्राख्याश्चत्वारो वर्णसंकेताः । ब्रह्मचारिगृहस्थ-वानप्रस्थसंन्यास्याख्या आश्रमसंकेताः । तैः एतैराश्रितैः केवलैर्न मोक्षः । न वा कर्मोपासनादिभिः, कर्मोपासनतपःस्वाध्यायदानादिभिर्वा न मोक्षो भवति । साधनसंपादितस्य फलस्य कृतकत्वात्, मोक्षस्य च नित्यत्वात् । किं बहुना ? ब्रह्मज्ञानं विना केनापि साधनेन मोक्षो न संभवति । तथा च वेदान्तडिण्डिमः- 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' (मु. ३-२-३). 'न कर्मणा न प्रजया धनेन' (ना. २८), 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे. ६-१५) - इति च ॥ १२ ॥

अथ ब्रह्मप्रपञ्चरूपौ द्वौ पदार्थावित्युक्तम् । तत्र कुत एतद्ब्रह्मैव श्रवणादिभिर्ज्ञेयं न प्रपञ्च इति ? न च वाच्यम् दुःखश्रान्त्यसमाधिकारणत्वात् हेयः प्रपञ्च इति । तत्रापि यत्किंश्चित्सुखविश्रान्तिसमाधानानां समुपलम्भात् । न च तेषां सुखादीनामनित्यत्वाद्दुःखादिमिश्रितत्वात् च हेयता । अनित्यानामपि यथासाधनं सुदीर्घकालभोगप्रदत्वोपपत्तेः, दुःखादिमिश्रितत्वेऽपि तादृशदुःखादिपरित्यागेन सुखादिमात्रस्योपादानसंभवाच्चेति । तत्राह -

**असत्यः सर्वसंसारो रसाभासादिदूषितः ।**
**उपेक्ष्यो ब्रह्म विज्ञेयमिति वेदान्तडिण्डिमः ॥ १३ ॥**

असत्यः इति । अस्य संसारस्य द्वे रूपे । परमार्थस्वरूपेण इदं सर्वं ब्रह्मैव । अज्ञानिदृष्टरूपेण तु नामरूपकर्मात्मकम् । तत्र यथाप्रतीतो नामरूपकर्मात्मकः संसारः सर्वोऽप्यसत्यः । संसरन्ति अस्मिन् इति संसारः प्रपञ्चः; संसरणं संसारः जन्मान्तरगमनं तत्तत्क्रियाफलभोगश्च । सर्वोऽप्येष न सत्यः, किं तु मिथ्याप्रतीतिमात्रशरीरः । यथा चेदं तथाग्रे वक्ष्यते । यथाप्रतीतरूपेण च रसाभासादिदूषितः संसारः । रसाभासः सुखाभासः । अत्र यद् गृह्यते सुखमिति तदाभासमात्रं न परमार्थसुखम् । एवं विश्रान्तिसमाधाने अप्यत्र परिदृश्यमाने आभासमात्रमेव । तेन रसाभासादिना दूषितोऽयं संसारः कुतस्तत्र सुखादिकम् ? अतः सर्वोऽप्ययं संसार उपेक्ष्यः । ब्रह्मैव विज्ञेयम् । तथा हि कश्चित् स्वप्ने राजानमात्मानं मन्वानः तत्र राज्यकृतं सुखं दुःखं चानुभवति । तदेव च निरतिशयसुखमित्यभिमन्यते स्वापकाले । प्रतिबुद्धस्तु स्वप्नमयम् इदं सर्वमित्युपेक्षते । जाग्रत्कालिकव्यवहार एव च बद्धादरो भवति । एवं सति सर्वातिशायिसुखार्थिना संसारविषये उपेक्षा कर्तव्या, ब्रह्मविचारे च बद्धादरेण भाव्यम् । संसारे क्वचित् उपलभ्यमानसुखादेरपि परमात्मानन्दप्रयुक्तत्वात् इति भावः । तथा हि **वेदान्तडिण्डिमः** - 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥' (श्वे. ६-२०), 'तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्' (श्वे.६-१२), 'को ह्येवान्यात्कः

प्राण्यात्। यदेष आकाश आनन्दो न स्यात्' (तै.२-७), 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ४-३-३२) इति ॥ १३ ॥

यत एवं ततो हित्वा संसारचिन्तां ब्रह्मज्ञाने प्रयत्नः कर्तव्य इत्येतदेव द्रढयन्नाह-

**वृथाक्रिया[1] वृथालापान्वृथावादान्मनोरथान् ।**
**त्यक्त्वैकं ब्रह्म विज्ञेयमिति वेदान्तडिण्डिमः ॥१४ ॥**

**वृथाक्रिया** इति। वृथा निष्फलीभूताः क्रियाः। विषयप्राप्त्यर्थं प्राप्तरक्षणार्थं च क्रियमाणाः क्रिया वृथैव । क्लेशावहत्वात् । विषयाणाम् अनित्यत्वात्, दुःखास्पदत्वाच्च । वृथालापानि निरर्थकानि भाषणानि । संसारिणां योगक्षेमविषयाणि, स्त्रीधननास्तिकादीनां चारित्रकथनानि च वृथैव। मनसः क्षोभनहेतुत्वात्, अन्ततो दुःखहेतुत्वाच्च । वृथावादान् निष्प्रयोजनान् वादजल्पवितण्डाख्यान् वादान्। केवलतर्कप्रधाना वादा वृथैव। अप्रतिष्ठितत्वात्, बुद्धेः क्षोभजनकत्वात्, परप्रद्वेषकारणत्वात्, दुःखमात्रे पर्यवसानाच्च। मनोरथान् मनस्येव विषयध्यानेन 'इदं लब्धमिदं लब्धव्यम्' इति विविधकल्पना मनोरथा इत्युच्यन्ते, तान्। मनोरथा अपि वृथैव। विकल्पनाकालेऽप्यर्थाभावात्, व्यर्थ कालक्षेपहेतुत्वाच्च। तानेतान् वृथाक्रियादीन् परित्यजेत्। ब्रह्मैवैकं ज्ञातुं प्रयतेत। तस्यैकस्यैव मोक्षहेतुत्वात् । इति वेदान्तडिण्डिमः - 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः' (मु. २-२-५) इति श्रुतेः ॥१४॥

तच्च ब्रह्मज्ञानं कीदृशम्? अत्राह -

**स्थितो ब्रह्मात्मना जीवो ब्रह्म जीवात्मना स्थितम् ।**
**इति संपश्यतां मुक्तिरिति वेदान्तडिण्डिमः ॥१५ ॥**

**स्थित** इति। जीवो ब्रह्मात्मना स्थितः। जीवस्य परमार्थस्वरूपस्यैव ब्रह्मशब्दार्थत्वात् । ब्रह्म जीवात्मना स्थितम् । ब्रह्मण एव अविद्यादृष्टिभिः पुरुषैर्जीवत्वेन गृह्यमाणत्वात्। एवं संपश्यतां सम्यक्छ्रवणमनननिदिध्यासनैः

1. वृथाक्रियाम् - दे. आ.

साक्षात्कृत्य पश्यतां मुक्तिरिति वेदान्तडिण्डिमः । 'तत्त्वमसि' (छां. ६-१५-३), 'अहं ब्रह्मास्मि' (बृ.१-४-१०), 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छा. ६-३-२), 'इन्द्रो मायाभिः पुरुरूप ईयते' (बृ. २-५-१९)- इत्यादिश्रुत्यन्तैरुक्तोऽयमर्थः इति भावः ॥ १५ ॥

कुत एवमुभयरूपेण ज्ञातव्यम् ? जीवो ब्रह्मेति ; ब्रह्म जीव इत्येव वा किं नालम् ? तत्राह -

**जीवो ब्रह्मात्मना ज्ञेयो ज्ञेयं जीवात्मना परम् ।**
**मुक्तिस्तदैक्यविज्ञानादिति[1] वेदान्तडिण्डिमः ॥१६॥**

**जीव** इति । जीवो ब्रह्मात्मना ज्ञेयः । तेन जीवस्य संसारिता मिथ्येति विज्ञातं भवति । ज्ञेयं जीवात्मना परम् । परं ब्रह्मापि जीवरूपेण भासते इत्येवं ज्ञातव्यम् । तेन ब्रह्मणः परोक्षताबुद्धिर्निवारिता भवति । तदैक्यविज्ञानात् तयोर्जीवब्रह्मणोः ऐक्यस्य विज्ञानात् मुक्तिः । 'जीवः', 'शारीरः', 'विज्ञानात्मा', 'क्षेत्रज्ञः' - इति च पर्यायशब्दाः । अत्र वास्तवेन वृत्तेन भिन्नात्मना स्थितयोरेव जीवपरयोरैक्यं न वेदान्तैः प्रतिपाद्यते । तादृशस्यैक्यस्य याथातथ्याभावप्रसङ्गात् । न च तदपीष्टम् ॥ तादृशैक्यविज्ञानान्मुक्त्यनुपपत्तेः । 'ब्रह्म वेद ब्रह्मैव भवति' (मु. ३-२-९) - इति हि वेदान्तडिण्डिमो ब्रह्मविज्ञानमात्राद् ब्रह्मभावापत्तिं दर्शयतीति ॥ १६ ॥

न केवलं ब्रह्मज्ञानान्मुक्तिः, किं तु ब्रह्मविज्ञानमनायासेन लभ्यमपि इत्याह-

**सर्वात्मत्वात् परं[2] ब्रह्म श्रोतुरात्मतया स्थितम् ।**
**नायासस्तत्त्वविज्ञप्ताविति वेदान्तडिण्डिमः ॥ १७ ॥**

**सर्वात्मत्वात्** इति । परं ब्रह्म सर्वजगत्कारणं, सर्वात्मत्वात् - यतः सर्वेषामपि आत्मा तस्मात्- श्रोतुः तत्त्वजिज्ञासोरप्यात्मतया स्थितं वस्तुगत्या । अतस्तत्त्वविज्ञप्तौ परब्रह्मणः स्वात्मत्वेन विज्ञप्तौ नायासो न श्रमः ।

1. विज्ञानमिति - मु. 2. सर्वात्मना - आ. दे

यथाविद्यमानविज्ञानस्यात्यन्तसुकरत्वात् । इति **वेदान्तडिण्डिमः**- 'अयमात्मा ब्रह्म' (बृ. २-५-१९.) इत्यादिरूपः ॥ १७ ॥

एवं संसारदुःखमोचकत्वात् सुलभत्वाच्च ब्रह्मज्ञानं संपादनीयमित्युक्तम् । तस्यैव अवीतन्यायेन दृढीकारार्थम् आह -

**ऐहिकं चामुष्मिकं च तापान्तं कर्मसञ्चयम् ।**
**त्यक्त्वा ब्रह्मैव विज्ञेयमिति वेदान्तडिण्डिमः ॥१८॥**

**ऐहिकम्** इति । ऐहिकम् इह लोके फलभोगार्थं च, आमुष्मिकं चामुष्मिन् परलोके फलभोगार्थं च यः कर्मसञ्चयः कर्मणां समाचरणात्संपादितः पुण्यराशिः । तं सर्वं त्यक्त्वा परिहृत्य । तस्य परिहारे हेतुः 'तापान्तम्' इति विशेषणेन द्योत्यते । यतः सर्वोऽपि कर्मसञ्चयस्तापान्तो दुःखपर्यवसानः । तस्माद्धित्वा सर्वं कर्मसञ्चयं नित्यानन्दरूपमोक्षं जिगमिषुणा विवेकिना ब्रह्मैव विज्ञेयम् । इति वेदान्तडिण्डिमः- 'तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' (छा. ८-१-६) 'तेषां सुखं शाश्वतं नेतरेषाम्' (श्वे. ६-१२) इति च श्रुतेः ॥१८ ॥

किं च,

**अद्वैतद्वैतवादौ द्वौ सूक्ष्मस्थूलदशां गतौ ।**
**अद्वैतवादान्मोक्षः स्यादिति वेदान्तडण्डिमः ॥१९॥**

**अद्वैतद्वैतवादौ** इति । अद्वैतवादो द्वैतवादश्चेति द्वौ वादौ । तौ च क्रमेण सूक्ष्मस्थूलदशां गतौ । तत्र द्वैतवादो नाम क्रियाकारकफलभेदः सत्य इति वादः । 'अहं कर्ता इमां क्रियां कृत्वा इदं फलं भोक्ष्यामि' इति दृढविश्वासयुतो वादः । अद्वैतवादस्तु, 'नाहं कर्ता भोक्ता वा, न मम कृतेनाकृतेन वा कश्चिदर्थोऽस्ति, नित्यशुद्धबुद्धमुक्तस्वभावोऽहमद्वितीयात्मा' इति निश्चययुक्तो वादः । सोऽयं सूक्ष्मः, सूक्ष्मदृशां संस्कृतमतीनां केषांचिदेव तत्र दृढप्रत्ययस्योत्पत्तेः । तत्र सूक्ष्मदशां

गतस्य अद्वैतवादस्यावलम्बनान्मोक्षः स्यादिति वेदान्तडिण्डिमः। 'को मोहः कः शोक एकत्वमनुपश्यतः' (ई. ७) इति श्रुतेः ॥ १९ ॥

कथमद्वैतवाद एव मोक्षकारणम् ? तत्राह -

**कर्मिणो विनिवर्तन्ते निवर्तन्त उपासकाः ।**
**ज्ञानिनो न निवर्तन्त इति वेदान्तडिण्डिमः ॥ २० ॥**

**कर्मिण** इति। कर्मिणः कर्मानुष्ठातारो विनिवर्तन्ते फलभोगस्यानन्तरं पुनरपि जन्म प्राप्नुवन्ति। उपासका देवतोपासनाकर्तारो ज्ञानरहिता ब्रह्मोपासकाश्च निवर्तन्ते। ज्ञानिनस्तु न निवर्तन्ते। जन्ममरणरहितस्वाभाव्यप्राप्तेः। इति वेदान्तडिण्डिमः - 'त एव पुनरावर्तन्ते' (प्र.१-९) 'जरामृत्युं ते पुनरेवापि यन्ति' (मु. १-२-७), 'यथाकर्म यथाश्रुतम्' (क.२-२-७) इत्यादिश्रुतिभ्यः। यद्यपि, 'तेषां न पुनरावृत्तिः' (बृ.६-२-१५), 'एतस्मान्न पुनरावर्तन्ते' (छां.१-१-१०) इत्यादिषु सगुणब्रह्मोपासकानामप्यपुनरावृत्तिः श्रूयते। तथापि, ब्रह्मलोकं गतानां तेषां तत्रैवोत्पन्नेन सम्यग्ज्ञानेन मुक्तिः पुनरावृत्त्यभावश्च। न पुनरुपासनाबलात् केवलात्। संयोगा विप्रयोगान्ता इति न्यायात्। यथोक्तं भगवद्गीतासु - 'आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' (गी. ८-१६) इति। तस्मात्साधूक्तं 'निवर्तन्त उपासका' इति ॥ २० ॥

किं च,

**परोक्षासत्फलं कर्म ज्ञानं प्रत्यक्षसत्फलम् ।**
**ज्ञानमेवाभ्यसेत्तस्मादिति वेदान्तडिण्डिमः ॥ २१ ॥**

**परोक्षम्** इति। परोक्षं देहपातानन्तरं कालान्तरे देशान्तरे च प्राप्तव्यम्, असत् अविद्याकृतत्वेनापरमार्थरूपं च फलं स्वर्गादिरूपं यस्य तदिदं परोक्षासत्फलम् कर्म। ज्ञानं तु प्रत्यक्षसत्फलम्। प्रत्यक्षं कालदेशादिव्यवधानाभावेन इहैव ज्ञानसमकालमेव प्राप्यं, सत् परमार्थरूपं च फलं कैवल्यरूपं यस्य तदिदं प्रत्यक्षसत्फलम्। ज्ञानविषयस्य ब्रह्मणः आत्मत्वादेव व्यवधानस्य अभावेन

नित्यप्राप्तत्वादपरोक्षत्वसिद्धिः । अव्यभिचरितस्वरूपविषयत्वाच्च परमार्थफलं ज्ञानम् । तस्माज्ज्ञानमेवाभ्यसेत् । ज्ञानप्राप्त्यर्थं श्रवणादिकमेवाभ्यसेत् इत्यर्थः । को ह्यमूढः करस्थं सुवर्णं विहाय स्वप्नकरस्थं मुकुरस्थं वा उपादातुमीहेत ? तथा च वेदान्तडिण्डिमः 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः' (के. २-५), 'एवमेवामुत्र पुण्यजितो लोकः क्षीयते' (छा. ८-१-६) 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. ३-४-१), 'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (क. २-३-१४) इति, 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत' (बृ. ४-४-२१), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८-७-१) इति च॥ २१ ॥

कर्मादिसाधनमपि ज्ञानार्थमेवेष्टव्यमित्याह-

**वृथा श्रमोऽयं विदुषां वृथायं कर्मिणां श्रमः ।**
**यदि न ब्रह्मविज्ञानमिति वेदान्तडिण्डिमः ॥ २२ ॥**

**वृथा** इति । विदुषां शास्त्रार्थज्ञानवताम् अयं श्रमः शास्त्रार्थविचाररूपः वृथा । अथवा विदुषामुपासकानाम् अयमुपासनानुष्ठानरूपः वृथा व्यर्थ एवेत्यर्थः । तथा कर्मिणाम् अपि अयं यागाद्यनुष्ठानरूपः श्रमः वृथा व्यर्थ एव । कदा अयं श्रमो व्यर्थो भवति ? तत्राह- यदि ब्रह्मविज्ञानं न जातम्, तदा उभयेषामपि व्यर्थ एव श्रमः । कर्मणामुपासनानां च ज्ञानार्थत्वात् । फलार्थम् उपात्तस्य साधनस्य फलपर्यन्तत्वाभावे हि व्यर्थ एव स्यात् तदनुष्ठानायासः ॥

यद्यपि शास्त्रज्ञानाभिवृद्धिः देवलोकप्राप्तिर्वा विदुषाम्, स्वर्गश्च कर्मिणामस्त्येव फलम्, तथा च न तेषां श्रमो व्यर्थ इव, तथापि अनल्पाक्षय्यं परमार्थफलं मोक्षं परित्यज्य अल्पक्षयिष्णुमिथ्याफलेनैव संतृप्तानां तेषां श्रमो व्यर्थ एव मुख्यफलस्य अनासादनादिति भावः । तथा हि **वेदान्तडिण्डिमः** - 'यत्कर्मिणो न प्रवेदयन्ति रागात्तेनाऽऽतुराः क्षीणलोकाश्च्यवन्ते' (मु. १-२-९), 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति

स कृपणः' (बृ. ३-८-१०) इति, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४-४-२२) इति च ॥ २२ ॥

ज्ञानप्राप्तेः परं तु साधनानां सुतरामनपेक्षा इत्याह -

**अलं यागैरलं योगैरलं[1] भोगैरलं धनैः ।**
**परस्मिन् ब्रह्मणि ज्ञात इति वेदान्तडिण्डिमः ॥ २३ ॥**

**अलम्** इति । परस्मिन् ब्रह्मणि स्वात्मतया ज्ञाते सति यागैरन्यैर्वा वेदोक्तकर्मभिः अलं कृतम्, पुनरपि तेषां कृत्याभावात् । एवं योगैरप्यलम्, मनःसमाधानेन सम्पादनीयाया विक्षेपहानेरितःपरमभावात् । एवं धनैरलम्, भोगैरप्यलम्, कृतकृत्यस्याप्तकामस्य धनादिषु भोगेषु वा स्पृहानुपपत्तेरिति भावः । इत्यस्मिन्नर्थे वेदान्तडिण्डिमो घोषयति- 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥' (बृ. ४-४-१२) इति, 'पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः' (मुं. ३-२-२) इति च ॥ २३ ॥

**अलं वेदैरलं शास्त्रैरलं स्मृतिपुराणकैः ।**
**परमात्मनि विज्ञात इति वेदान्तडिण्डिमः ॥ २४ ॥**

**अलम्** इति । परमात्मनि स्वात्मतया विज्ञाते सति अलं वेदैः, तैः ज्ञातव्यस्य ज्ञातत्वात्, ज्ञातव्यान्तराभावाच्च । अलं शास्त्रैः, सर्वस्यापि शास्त्रस्य साक्षात् परम्परया वा वेदतात्पर्यभूतपरमात्मतत्त्वनिर्धारणे एव पर्यवसानात्, तस्य च ज्ञातत्वात् । अलं स्मृतिपुराणकैः, तेषामपि वेदार्थोपबृंहणार्थत्वात् । वेदार्थस्य च निर्धारितत्वात् । इत्येवं अर्थेऽपि अस्ति वेदान्तडिण्डिमः - 'सर्वे वेदा यत्पदमामनन्ति' (क. १-२-१५) इति, 'वेदा अवेदाः' (बृ. ४-३-२२) इति च ॥ २४ ॥

---

1. भुक्त - दे

**नर्चा न यजुषार्थोऽस्ति न साम्नार्थोऽस्ति कश्चन ।**
**जाते ब्रह्मात्मविज्ञान इति वेदान्तडिण्डिमः ॥ २५ ॥**

**नर्चा** इति । शारीरात्मनः पारमार्थिकमसंसारिस्वरूपं ब्रह्मात्मता, 'नाहमस्मि संसारी शारीरः परिच्छिन्नात्मा, किं त्वशरीरोऽसंसारी ब्रह्मात्मैव' इति ब्रह्मात्मनो विज्ञानं ब्रह्मात्मविज्ञानम् । तस्मिन् जाते सति, न ऋचा अर्थः प्रयोजनमस्ति, न यजुषा, नापि साम्ना कश्चनार्थोऽस्ति । त्रैविद्यज्ञानस्य केवलं यागाद्यनुष्ठानप्रयोजनत्वात्, तत्फलस्य च ब्रह्मात्मविज्ञानफलान्तर्भूतत्वात्तेच्चेति भावः । 'यस्तन्न वेद किमृचा करिष्यति' (श्वे. ४ - ८), 'सर्वं तदभिसमैति यत्किञ्च प्रजाः साधु कुर्वन्ति' (छा.४-१-४), 'सर्वे वेदा यत्रैकं भवन्ति' (तै. आ. ३-११) इति चैवं वेदान्तडिण्डिमः ॥ २५ ॥

कर्मणामुपासनानां च ज्ञानार्थत्वमुपक्षिप्तं प्राक् । तत् कया प्रणाड्या? तत्राह-

**कर्माणि चित्तशुद्ध्यर्थमैकाग्र्यार्थमुपासना[1] ।**
**मोक्षार्थं ब्रह्मविज्ञानमिति वेदान्तडिण्डिमः ॥ २६ ॥**

**कर्माणि** इति । निष्कामेन मुमुक्षुणा कृतानि कर्माणि चित्तशुध्यर्थं भवन्ति । नान्यत्फलमेषां भवति । यद्यपि सकामेन कृतानि तानि फलान्तराय कल्पन्ते 'कर्मणा पितृलोकः' (बृ.१-५-१६) इत्यादिश्रुतेः, तथापि फलाभिसन्धिरहितेन कृतानि तान्युपात्तदुरितक्षयहेतुत्वद्वारेण चित्तसंस्कारार्थमेव भवन्तीत्यर्थः । एवं 'विद्यया देवलोकः' (बृ. १-५-१६) इत्यादि श्रुतिप्रामाण्यात् फलान्तरदायीन्युपासनानि मुमुक्षोरैकाग्र्यार्थमेव भवन्ति । कर्मणा निर्मलीभूतमुपासनया च विक्षेपरहितं सदन्तःकरणं तत्त्ववेदने योग्यं भवतीत्यर्थः । उत्पन्नं तु ब्रह्मविज्ञानं मोक्षार्थमेव भवति, न सहकार्यन्तरं स्वफलदानाय अपेक्षते । इति वेदान्तडिण्डिमः- 'धर्मेण पापमपनुदति' (ना. ७९) इति, 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' (ई. १४), 'यदाऽऽ त्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह

1. उपासनम् - आ.

युक्तः प्रपश्येत् । अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥' (श्वे. २-१५) इति च ॥ २६ ॥

ननु कर्माणि ज्ञानात्पूर्वमेव न तु तदुदयादूर्ध्वमपीत्येतत् कुतः ? तत्राह-

**सञ्चितागामिकर्माणि दह्यन्ते ज्ञानवह्निना ।**
**प्रारब्धान्यप्यनुभवादिति[1] वेदान्तडिण्डिमः ॥ २७ ॥**

**सञ्चित॰** इति । पूर्वजन्मसु कृतानि यान्यप्रवृत्तफलानि तानि संचितकर्माणीत्युच्यन्ते । यानि तु प्रवृत्तफलानि तानि प्रारब्धानीति । यानि पुनर्भविष्यत्काले करिष्यमाणानि तान्यागामिकर्माणि । तत्र ज्ञानवह्निना अकर्त्रात्मबोधेन सञ्चितकर्माणि दह्यन्ते, अग्निदग्धबीजानीव जन्मान्तराङ्कुरोदयहेतुत्वशक्तिविहीनानि क्रियन्ते इत्यर्थः । तथाऽऽगामिकर्माण्यपि । यद्यप्यागामिकर्मणामिदानीमभावात् प्रदाहो न संभवति, तथापि तेषु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मवित्, ज्ञानप्रदग्धाविद्याबीजत्वादिति भावः । एवं हि वेदान्तडिण्डिमः- 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा. ५-२४-३), 'क्षीयन्ते चास्य कर्माणि' (मु. २-२-८) इति, 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' (छा.४-१४-३), 'उभे उ ह्येवैष एते तरति' (बृ. ४-४-२२) इति च ॥

प्रारब्धफलानि तु कर्माणि अनुभवादेव दह्यन्ते उपक्षीणानि भवन्तीत्यभिप्रायः । 'प्रारब्धानुभवान्मोक्षः' इति पाठे तु प्रारब्धकर्मफलोपभोगात्परं कर्मविपाकासम्भवात् तदनु जन्ममरणप्रबन्धे नास्त्येव विदुषः प्रवेश इत्यर्थः । तदेवं ज्ञानात्कर्मणामुपमर्द एव भवतीति न ज्ञानादूर्ध्वमपि तस्य कर्मसंबन्ध इति भावः । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा.६-१४-२) इति श्रुतेः ॥२७॥

योऽयं कर्मनाशः प्रारब्धोपभोगश्चोक्तः, नासौ परमार्थदृष्ट्या । यतः-

**न पुण्यकर्मणो[2] वृद्धिर्न हानिः पापकर्मणः[3] ।**

1. प्रारब्धानुभवान्मोक्षः - आ. दे.

2. पुण्यकर्मणा ; 3. पापकर्मणा - आ.

**नित्यासङ्गात्मनिष्ठानामिति वेदान्तडिण्डिमः ॥ २८ ॥**

न पुण्य० इति । नित्यमसङ्गो नित्यासङ्गः, सदापि कर्मसंबन्धहीनत्वात् । यद्वा नित्यश्चासौ असङ्गश्चेति नित्यासङ्ग आत्मा । कालकृतपरिच्छेदरहितो द्वितीयवस्तुकृतपरिच्छेदशून्यश्चेत्यर्थः । तस्मिन् नित्यासङ्गात्मनि निष्ठा तात्पर्येणावस्थानम् निश्चिततादात्म्यबुद्धिर्येषामात्मज्ञानिनां, ते नित्यासङ्गात्मनिष्ठाः । तेषां पुण्यकर्मणो वृद्धिर्न स्यात्, नापि पापकर्मणो हानिः स्यात् । न हि नित्यस्य निष्क्रियस्य स्वतो हानिवृद्धयः संभवन्ति, नित्यासङ्गस्य परतो वा । ईदृशश्च परमात्मा 'नित्यो नित्यानाम्' (श्वे. ६-१३), 'निष्कलं निष्क्रियं शान्तम् (श्वे. ६-१९), 'असङ्गो ह्ययं पुरुषः' (बृ. ४-३-१६) इति च श्रुतेः । तन्निष्ठानां चाकर्त्रात्मबुद्ध्या दग्धाविद्याद्यखिलक्लेशत्वात् न कर्मनिमित्ते हानिवृद्धी संभवतः । क्लेशमूलो हि पुण्यापुण्यकर्माशयविपाक इति । इत्यस्मिन्नर्थे वेदान्तडिण्डिमः - 'न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान्' (बृ.४-४-२२) इति । नन्वेवं यथेष्टचेष्टाप्रसङ्गः । न, प्रवर्तकस्याभिमानस्याप्यभावादित्यपि द्रष्टव्यम् ॥ २८ ॥

ननु ज्ञानादूर्ध्वं भवत्वागामि कर्मणो वैफल्यम् । कथं बुद्धिपूर्वं कृतानां कर्मणां विनाशः ? स्मरन्ति हि 'नाभुक्तं क्षीयते कर्म' इति । तद्यदि भोगमन्तरेणैव क्षीयेत कर्म, तर्हि शास्त्रं कदर्थितं स्यादिति । अत्रोच्यते -

**बुद्धिपूर्वाबुद्धिपूर्वकृतानां पापकर्मणाम्[1] ।**
**प्रायश्चित्तमहो ज्ञानमिति वेदान्तडिण्डिमः ॥ २९ ॥**

**बुद्धिपूर्व०** इति । बुद्धिपूर्वं कृतानि यानि कर्माणि, यानि चाबुद्धिपूर्वं कृतानि, तेषां सर्वेषां ज्ञानं प्रायश्चित्तम् । यथा प्रायश्चित्तेन दुरितक्षयः संभवति शास्त्रविहितत्वात् प्रायश्चित्तस्य, एवं शास्त्रजनितेन ब्रह्मात्मविज्ञानेन सर्वपापनिवृत्तिरुपपद्यत इत्यर्थः । पापशब्देन पुण्यमप्युपलक्ष्यते । अकर्त्रात्म

---

1. 'अविद्योपाधिको जीव' इति (३१) श्लोकानन्तरमस्य पाठः - आ.

बोधनिमित्तस्य क्षयस्य तुल्यत्वात्। उदाहृता च श्रुतिः - 'उभे उ ह्येवैष एते तरति' (बृ. ४-४-२२) इति पुण्यनाशस्याप्युपसङ्ग्राहिका ॥

अत्रेदं बोध्यम् - ज्ञानं न प्रायश्चित्तविधया पूर्वकृतं पापं विनाशयति। अपि तु अकर्त्रात्मयाथात्म्यप्रकाशनेन कर्मसंबन्धमज्ञानतमःकृतम् बाधते। अत एव तुल्यन्यायेन पुण्यस्यापि विनाशः संभवतीति। 'प्रायश्चित्तम्' इति मूलं तु प्रायश्चित्तवत् प्रायश्चित्तम् इति व्याख्येयम्। ज्ञानी हि उभे पुण्यपापे आत्मदृष्ट्यैव पश्यति, अतो नास्ति तद् दृष्ट्या पुण्यं पापं वा आत्मनः पृथग्भूतम्। 'उभे ह्येवैष एते आत्मानꣳस्पृणुते' (तै. २-९) इति हि वेदान्तडिण्डिमः। 'अहो! आश्चर्यम् इति ज्ञानस्तुतिः ॥ २९ ॥

अद्धितीयब्रह्मात्मविज्ञानादेव परमार्थफलं सद्योमुक्तिः, कर्मोपासनादीनां तु वेदविहितानां ब्रह्मविज्ञानयोग्यताप्राप्तिरेव मुख्यं फलम् - इत्युक्तम्। ब्रह्मज्ञानादूर्ध्वं च पुण्यापुण्यकर्माणि सर्वात्मना क्षीयन्ते इति स्तुता ब्रह्मविद्या। तत्र ब्रह्मणोऽद्धितीयत्वं कथं शक्यविज्ञानं जाग्रति जीवजगदीश्वरभेदज्ञाने इत्यत आह-

**दृग्दृश्यौ द्वौ पदार्थौ तौ परस्परविलक्षणौ ।**
**दृग् ब्रह्म दृश्यं माया स्यादिति वेदान्तडिण्डिमः ॥ ३० ॥**

**दृग्दृश्यौ** इति। दृग्दृश्यौ द्वौ पदार्थौ। व्याख्यातप्रायमेतद्वाक्यं ज्ञातृज्ञेयेत्यत्र (४)। अत्र जगच्छब्दस्थाने मायेति अद्धितीयत्वप्रदर्शनार्थम्। यथा हि मायाप्रसारितसूत्रतदारूढमायाविभिर्न परमार्थमायाविनो भूमिष्ठस्य सद्धितीयता, एवं मिथ्यारूपेण जगता दृश्येन न ब्रह्मणो दृगात्मनः सद्धितीयतेति। तथा च श्रुतिः- 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ३-७-२३) इति, 'मायां तु प्रकृतिं विद्यात्' (श्वे. ४-१०) इति च। जगत्सर्वम् अविद्याकल्पितनामरूपमायाविकारत्वान्मायेत्युच्यते ॥ ३० ॥

अत्र जीवेश्वरभेदं व्यावहारिकं व्याकरोत्यद्वितीयब्रह्मात्मविज्ञापनाय -

**अविद्योपाधिको जीवो मायोपाधिक ईश्वरः ।**
**मायाविद्यागुणातीतं ब्रह्म वेदान्तडिण्डिमः ॥ ३१ ॥**

**अविद्योपाधिक** इति । उपाधीयते परिचीयते व्यावर्त्यं वस्तु अनेनेत्युपाधिर्व्यावर्तकः । व्यावर्त्यस्वरूपेऽप्रविष्टोऽपि तदन्वय्येवात्र उपाधिशब्दग्राह्यः । यथा घटाकाशस्वरूपेऽप्रविष्टोऽपि घटो घटाकाशं मठाकाशादिभ्यो व्यावर्तयतीति तदुपाधिर्भवति । एवमविद्याकृतकार्यकरणसङ्घातः उपाधिः यस्य सोऽयं जीवोऽविद्योपाधिकः । तथा अविद्याकृतनामरूपबीजमायैव उपाधिर्यस्य सोऽयं मायोपाधिक ईश्वरः । तदेवमुपाधिद्वयस्याप्यविद्याकृतत्वात् ब्रह्म-चैतन्यं मायाविद्यागुणातीतम्, मायाविद्याकृतविशेषरहितम्, नित्यशुद्धबुद्ध-मुक्तस्वभावमिति यावत् । तस्मान्नाद्वैतहानिरित्यभिप्रायः । 'एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' (प्र. ४-९), 'मायिनं तु महेश्वरम्' (श्वे. ४-१०), 'अस्थूलमनणु' (बृ. ३-८-८), 'अथात आदेशो नेति नेति' (बृ. २-३-६) इति च वेदान्तडिण्डिमेभ्यः ॥ ३१ ॥

तद्ब्रह्मात्मतत्त्वं स्वरूपेण कीदृशम् ? तत्राह-

**साकारं च निराकारं सगुणं चागुणात्मकम् ।**
**तत्त्वं तद्ब्रह्म परम[1]मिति वेदान्तडिण्डिमः ॥ ३२ ॥**

साकारम् इति । आकारैः सह वर्तत इति साकारम्, तद्विपरीतं निराकारम् । तथा गुणैः सह वर्तत इति सगुणम्, तद्विपरीतमगुणात्मकम् निर्गुणम् । यद्यपि स्वरूपतो निर्गुणं निराकारं च ब्रह्म, तथापि मायावेशवशेन साधकानुग्रहार्थं साकारं सगुणं च भवति । इत्युभयथापि भवति वेदान्तडिण्डिमः - 'अस्थूलमनण्वह्र-स्वमदीर्घम्' (बृ. ३-८-८) इति, 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छा. ३-१४-२), 'हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णः' (छा. १-६-६) इति चैवमादिः ॥ ३२ ॥

एतादृशस्य ब्रह्मणो विज्ञानादेव निरुपचरितं ब्राह्मण्यं सिध्यतीत्याह -

**द्विजत्वं विध्यनुष्ठानाद्विप्रत्वं वेदपाठतः ।**
**ब्राह्मण्यं ब्रह्मविज्ञानादिति वेदान्तडिण्डिमः ॥ ३३ ॥**

1. परम् ब्रह्म - आ. दे.

**द्विजत्वम्** इति । यथा विध्युक्तकर्मणामनुष्ठानात् द्विजसंज्ञितो भवति, नान्यथा । यथा च वेदाध्ययनादेव विप्रसंज्ञितः, एवं श्रुतिप्रामाण्याद्ब्रह्मज्ञानादेव ब्राह्मणो भवति । अन्यत्र तु गौणो ब्राह्मणशब्दप्रयोगः । 'एष नित्यो महिमा ब्राह्मणस्य' (बृ. ४-४-२२), 'अथ ब्राह्मणः' (बृ. ४-५-१) इति च श्रुतेः ॥३३॥

ब्रह्मणोऽद्वितीयत्वे न्यायमाह-

**सर्वात्मना स्थितं ब्रह्म सर्वं ब्रह्मात्मना स्थितम् ।**
**न कार्यं कारणाद्भिन्नमिति वेदान्तडिण्डिमः ॥३४॥**

**सर्वात्मना** इति । ब्रह्म सर्वात्मना स्थितम् , ब्रह्मणः प्रपञ्चकारणत्वात् प्रपञ्चरूपेण स्थितं ब्रह्मेत्यर्थः । तदेतत्प्रतीत्या । परमार्थतस्तु सर्वं ब्रह्मात्मना स्थितम् । का तत्र युक्तिः ? 'न कार्यं कारणाद्भिन्नम्' । प्रपञ्चः कार्यं ब्रह्म च कारणमिति श्रूयते - 'इदꣳसर्वमसृजत' (तै. २-६), 'यतः प्रसूता जगतः प्रसूती' (ना. १) इत्यादि आम्नायात् । तस्मात् ब्रह्मणोऽनन्यः, तद्व्यतिरेकेण नास्त्येव प्रपञ्च इत्यभिप्रायः । 'सर्वं खल्विदं ब्रह्म, तज्जलान्' (छा. ३-१४-१) इति हि वेदान्तडिण्डिमः ॥ ३४ ॥

अथ कथं ब्रह्मकार्यत्वं प्रपञ्चस्य, कारणधर्मानुगतेरदर्शनात् ? इत्याशङ्क्याह-

**सत्तास्फुरणसौख्यानि भासन्ते सर्ववस्तुषु ।**
**तस्माद्ब्रह्ममयं सर्वमिति वेदान्तडिण्डिमः ॥ ३५ ॥**

**सत्ता०** इति । सर्ववस्तुष्वपि सत्तास्फुरणसौख्यानि भासन्ते 'अस्ति', 'भाति', 'प्रियम्' - इति सर्वत्र प्रतीतिर्भवतीत्यर्थः । ब्रह्म च सच्चिदानन्दरूपम्। तस्मादनुगमात्कारणधर्माणां प्रपञ्चः परब्रह्मकार्यमित्यर्थः । यद्यपि सर्वेषु वस्तुषु चेतनत्वं सुखरूपत्वं वा न नियमेन भासते, जडपदार्थानां दुःखास्पदानां बहुलमुपलम्भात् । सत्तैव तु सर्वत्र दृश्यत इति निर्विवादम् । तथापि 'अस्तीदं', 'भातीदं'- इति सत्ताभाने सर्वत्र भासेते । प्रियत्वं तु जीवानामदृष्टानुसारेण

क्वचिदविभाव्यमानम् अप्रियत्वभ्रान्तिं जनयतीति विशेषः । तदेवं सत्तास्फुरत्ताप्रियत्वानां सर्वत्रानुवर्तनात् सच्चिदानन्दब्रह्ममयत्वं सर्वस्य सिद्धमिति भावः । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१), 'सच्च त्यच्चाभवत् ..... यदिदं किं च' (तै. २-६), 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति' (तै. ३-६)- इत्यादिवेदान्तडिण्डिमात् ॥ ३५ ॥

सर्वं ब्रह्ममयमित्युक्तम् । तत्र ब्रह्म कारणम्, प्रपञ्चश्च कार्यमिति किं द्वे पृथग्वस्तुनी ? नेत्याह-

**घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च[1] ।**
**तथा ब्रह्म जगत्सर्वमिति वेदान्तडिण्डिमः ॥ ३६ ॥**

घटकुड्यादिकम् इति । यथा घटकुड्यादिकं घटशरावोदञ्चनादिरूपं, कुड्यकुट्टिमादिरूपं च सर्वम्, मृत्तिकामात्रमेव च न तु वस्तुवृत्तेन कार्यं नाम कारणादन्यत् किंचिदस्ति । नाममात्रेण ह्येतद्भिद्यते घटः शराव उदञ्चनमित्येवम्, न तु वस्तुतः, सर्वत्र मृदात्मकत्वाविशेषात् । तथा ब्रह्म जगत्सर्वम्, ब्रह्मैव सत्यम्, न तु तद्व्यतिरेकेण सर्वशब्दवाच्यः प्रपञ्चोऽन्योऽस्ति । 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा. ६-१-४), 'इदं सर्वं यदयमात्मा' (बृ.२-४-६), 'ब्रह्मैवेदं विश्वम्' (मु. २-२-११) इत्यादि श्रुतिडिण्डिमैरेवमुद्घोषणात् ॥३६॥

अथाधुना ब्रह्मात्मैकत्वमनुभवारूढं कुर्वन्नाह -

**अवस्थात्रितयं यस्य क्रीडाभूमितया स्थितम् ।[2]**
**तदेव ब्रह्म जानीयादिति वेदान्तडिण्डिमः ॥३७॥**

अवस्थात्रितयम् इति । जाग्रत्स्वप्नसुषुप्त्याख्यस्तिस्रोऽवस्थाः । समस्त लौकिकवैदिकव्यवहारास्पदीभूता ग्राह्यग्राहकलक्षणा जागरितावस्था, असत्यपि

---

1. 'पुरुषार्थत्रयाविष्टाः' (४०) इत्यनन्तरमस्य निवेशः - आ दे.

2. यन्नादौ यच्च नास्त्यन्ते (३८) इत्यतः परमस्य पाठः - क

वस्तुनि वस्तुवदुपलम्भनसहिता ग्राह्यग्राहकलक्षणा स्वप्नावस्था, ग्राह्यग्रहणवर्जिता सुषुप्त्यवस्था - इत्यवस्थात्रितयं यस्य चैतन्यरूपस्य क्रिडाभूमितया स्थितम्, क्रीडार्थमेव कल्पितं मायात्मकम्, न तु स्वात्मनो भिन्नं परमार्थसत्यम्, मानाभावात् । तदेव साक्षिचैतन्यं ब्रह्म जानीयात्, अद्वितीयं ब्रह्मात्मतत्त्वं जानीयात् इत्येतदर्थे वेदान्तडिण्डिमः - 'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति ॥ स्वप्ने तु जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके । सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रिडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ॥ आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च' (कै. १-१२, १-१३, १-१४) इति ॥

सर्ववादिकल्पितवस्तूनामत्रैवान्तर्भावात्, विज्ञेयान्तराभावाच्च अवस्थात्रितयपरीक्षणेनैव ब्रह्मात्मसत्यत्वं जगन्मिथ्यात्वं च सेत्स्यतीति भावः ॥

ननु साक्षिचैतन्यस्य तद्विषयस्य अवस्थात्रितयोपलब्धप्रपञ्चस्य च समानं भानम् । तत्र कुत एतदवसीयते चैतन्यमात्रं सत्यम्, प्रपञ्चस्तु मायाकृत इति ? तत्राह श्लोकद्वयेन -

**यन्नादौ यच्च नास्त्यन्ते तन्मध्ये भातमप्यसत्**
**अतो मिथ्या जगत्सर्वमिति वेदान्तडिण्डिमः ॥ ३८ ॥**

यन्नादौ इति । आदौ यन्नास्ति, अन्ते च यन्नास्ति तत् मध्ये भातमप्यसत्, मिथ्येत्यर्थः । जाग्रत्प्रपञ्चो हि जाग्रदवस्थामात्रप्रतिबद्धः, तदवस्थोदयात्पूर्वं न विद्यते, नापि जाग्रदवस्थाया अस्तमयान्ते विद्यते । तस्मात् स प्रपञ्चो जाग्रत्काले भासमानोऽप्यसन्नेवेत्यवसेयः । यथा स्वाप्नप्रपञ्चस्तदवस्थामात्रप्रतिबद्धः स्वप्नकाल एव भासमानो मिथ्यैव, आद्यन्तयोरभावात् ॥

न च वाच्यम्, स्वकाले भासमानत्वमेव सत्यत्वम्, न पुनरव्यभिचरित स्वरूपत्वमिति । शुक्तिरजतमरुमरीचिकादीनामपि स्वकाले भासमानानां

सत्यत्वप्रसङ्गात् । अतः आद्यन्तयोरभावात् सर्वमपि जगत् स्वकाले भातमपि मिथ्यैव, प्रतीतिमात्रशरीरमेव, न पुनः परमार्थसदित्यभिप्रायः । यद्यपि जाग्रत्स्वप्नसुषुप्तीनां नास्ति कश्चित् कालकृतः क्रमः, कालस्यापि जाग्रत्स्वप्नप्रतिबद्धस्यैव भानात् तत्तदवस्थासीमातिक्रमणे शक्त्यभावात् । तथापि लोकदृष्टिमनुसृत्यैवेदमुक्तम् आदावन्ते च यन्नास्तीति - इति ध्येयम् ॥

इति वेदान्तडिण्डिमः । जाग्रत्प्रतिबद्धं जगत् स्वप्नसुषुप्त्योर्नास्त्येव, जाग्रत्काले प्रतिभातमप्यसदेवेत्यर्थमुत्घोषयति वेदान्तवचनडिण्डिमः । 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते' (बृ. ४-३-१०), 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४-३-२३) इति, 'नेह नानास्ति किंचन' (बृ. ४-४-१९), 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ. ४-५-१५) इति चैवमादिः ॥ ३८ ॥

**यदस्त्यादौ यदस्त्यन्ते यन्मध्ये भाति तत्स्वयम् ।**
**ब्रह्मैवैकमिदं सत्यमिति वेदान्तडिण्डिमः ॥ ३९ ॥**

यत् इति । यदादावस्ति, यदन्तेऽस्ति, यन्मध्ये च स्वयं भाति तदिदं ब्रह्मैवैकं सत्यम्, न हि साक्षिचैतन्यं जाग्रदवस्थाप्रतिबद्धम्, तदुदयात् पूर्वं तदस्तमनादनन्तरमपि भानात् । न वा स्वप्नावस्थाप्रतिबद्धम्, तत्राप्यादावन्तेऽपि सद्भावस्य समानत्वात् । अत एव हेतोर्नापि सुषुप्तिप्रतिबद्धम् । नापि क्वचिदभानं तस्य, यथा जगतः सुषुप्तौ भानं नास्ति । नापि परतन्त्रं भानं तस्य, यथा जगतः स्वकाले भासमानस्यापि चैतन्यभानप्रयुक्तमेव भानम् । तदेवं ब्रह्मात्मनो नित्यस्वयंप्रकाशरूपत्वात् तस्यैवैकस्य सत्यत्वं युक्तम्, न तु जगत इति वेदान्तडिण्डिमः - 'आत्मैवास्य ज्योतिर्भवतीति' (बृ. ४-३-६), 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. ४-३-२३), इति, 'तत्सत्यं स आत्मा' (छा.६-८-७), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१) इति चैवमादिः ॥

अथेदानीं तत्त्वाधिगमार्थं प्रसंख्यानं विवक्षुर्मुमुक्षुतां स्तौति -

**पुरुषार्थत्रयाविष्टाः पुरुषाः पशवो ध्रुवम् ।**
**मोक्षार्थी पुरुषश्रेष्ठ इति वेदान्तडिण्डिमः ॥ ४० ॥**

**पुरुषार्थत्रयाविष्टा** इति । पुरुषार्था धर्मार्थकाममोक्षाः । पुरुषैरर्थ्यमानानां सर्वेषामपि यथायोग्यमेतेष्वेवान्तर्भावात् । तेषां पुरुषार्थानां मध्ये आद्यास्त्रयः पुरुषार्थत्रयम्, धर्मार्थकामरूपम् । तस्मिन् पुरुषार्थत्रये त्रिवर्गे आविष्टा अभिनिविष्टाः अभिमानेन प्रविष्टा ये पुरुषाः, ते ध्रुवं नूनं पशवः पशुतुल्या इत्यर्थः । यद्यपि पशवः पुरुषा इव न जन्मान्तरलोकान्तरसंबन्धिनामात्मानं जानन्ति तथापि परमार्थज्ञानं, इष्टानिष्टप्राप्तिपरिहारोद्योगश्चेत्येतदुभयं समानं पशुभिः पुरुषार्थत्रयाविष्टानामिति भावः । यथा च पशवो मनुष्याणां दोहनवाहनाद्युपकारैरुपभोग्यास्तद्दत्ततृणादिभिरेव तृप्यन्ति, एवं देवादिभिर्यागादिना उपभोग्यास्तद्दत्तत्रिवर्गफलमात्रेण तृप्ताः पुरुषा अप्यनवरतं श्राम्यन्ति तादृशक्षुद्रफलप्रापकं कर्म कुर्वाणा इति नूनं ते पशव एव । यः पुनर्मोक्षेण ज्ञानैकलभ्येन परमपुरुषार्थेनार्थी स एव पुरुषश्रेष्ठः । इति वेदान्तडिण्डिमः - 'यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान् भुनक्ति' (बृ. १-४-१०) इति, 'अथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः (बृ. ३-८-१०) इति च ॥ ४० ॥

सोऽयं मोक्षः कथं प्राप्तव्यः ? तत्राह-

**षण्निहत्य त्रयं हित्वा द्वयं भित्त्वाऽखिलातिगम् ।**
**एकं बुद्ध्वाऽश्नुते मोक्षमिति वेदान्तडिण्डिमः ॥ ४१ ॥**

षट् इति । षडूर्मीर्निहत्य, त्रयम् एषणात्रयं हित्वा, द्वयं कर्तृत्वभोक्तृत्वरूपं भित्त्वा, अखिलातिगं सर्वद्वैतातीतम् एकम् अद्वितीयं ब्रह्मात्मतत्त्वं बुद्ध्वा मोक्षमश्नुते कैवल्यं प्राप्नोति । इति वेदान्तडिण्डिमः - 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' (बृ.३-५-१), 'पुत्रैषणायश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' (बृ. ३-५-१), 'कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता' (ना. ७९),

'एतमानन्दमयमात्मानमुपसंक्रामति' (तै. २ -८) इत्यादिः ॥ ४१ ॥

**हित्वा[1] षट् पञ्च भित्वाथ गत्वाग्रे[2] चतुरस्त्रिकम्**
**द्वयं हित्वाश्रयेदेकमिति वेदान्तडिण्डिमः ॥ ४२ ॥**

**हित्वा** इति । षट्-कामक्रोधलोभमोहमदमात्सर्याख्यदोषान् हित्वा, पञ्चअन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्यान् कोशान् भित्त्वा, अथ अग्रे प्रथमत एव चतुरः-विवेकवैराग्यशमादिसंपन्मुमुक्षाख्यया प्रसिद्धान् गत्वा प्राप्य, त्रिकं-श्रवणमनननिदिध्यासनाख्यान् गत्वा, द्वयं जीवेश्वरभेदं हित्वा, एकमद्वितीयं ब्रह्मात्मतत्त्वमाश्रयेत् इति वेदान्तडिण्डिमः 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः' (क.२-३-१४), 'एतमन्नमयमात्मानमुपसंक्रम्य' (तै. ३-१०), ब्राह्मणो निर्वेदमायात्' (मु.१-२-१२), 'शान्तो दान्त उपरतस्तितिक्षुः समाहितः (श्रद्धावित्तो) भूत्वात्मन्येवात्मानं पश्येत्' (बृ. ४-४-२३), 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५), अन्योऽसावन्योऽहमस्मीति न स वेद' (बृ. १-४-१०), 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्' इत्यादिरूपः (मु. २- २ - ४) ॥ ४२ ॥

अथातीतानन्तरश्लोकद्वयसंगृहीतमर्थं विवरिष्यति कतिभिश्चित् श्लोकैः । तत्र षडूर्मीः कथं निहन्यादित्यत्राह 'देह' इत्यादिभिस्त्रिभिः-

**देहो नाहमहं देही देहसाक्षीति निश्चयात् ।**
**जन्ममृत्युप्रहीणोऽसाविति वेदान्तडिण्डिमः ॥४३॥**

**देह** इति । अहं न देहः, नापि देही, देहेन मम संबन्धोऽपि नास्तीति भावः । अत्र मध्यमणिन्यायेन न देहः, न देहीत्युभयत्रापि नञः संबन्धो ज्ञेयः । यद्वा 'देवो देहसाक्षी' ति पाठः कल्प्यः, उत्तरत्र तथैव भूयः पाठदर्शनात् । अस्मिन् पक्षे तु देवः स्वयंप्रकाशस्वभाव इत्यर्थः । 'अहं चित्स्वभावो देहसाक्षी' चेति निश्चयात् जन्ममृत्युप्रहीणोऽसौ देहधर्माः जन्ममृत्युप्रमुखाः प्रहीयन्ते । साक्षिगोचरधर्माणां साक्षिणि संक्रमाभावादिति भावः । 'जरामृत्यु०' इत्यपि पाठः । ऊर्मिषट्कमध्ये

1. भित्वा - आ दे. 2. भित्त्वाथ - आ दे.

अन्तिमद्विकं देहप्रविवेकाद्धातव्यमित्यभिप्रायः । 'न जायते म्रियते वा विपश्चित्' (क.१-२-१८), 'अशरीरं शरीरेषु' (क.१-२-२२) इत्यादिर्वेदान्तडिण्डिमः ॥४३॥

**प्राणो नाहमहं देवः प्राणसाक्षीति निश्चयात्**
**क्षुत्पिपासोपशान्तिः स्यादिति वेदान्तडिण्डिमः . ॥ ४४ ॥**

प्राण इति । एवं प्राणस्यापि साक्षिगोचरत्वनिश्चयात् तादृशनिश्चयवतः साक्षित्वात् प्राणधर्मयोः क्षुत्पिपासयोरुपशान्तिः स्यात् । इति वेदान्तडिण्डिमः - 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ । (क. २-२-५) इत्यादिरूपः ॥ ४४ ॥

**मनो नाहमहं देवो मनःसाक्षीति निश्चयात् ।**
**शोकमोहापहानिः स्यादिति वेदान्तडिण्डिमः ॥ ४५ ॥**

मन इति । तथा मनसो विवेकात् तत्साक्षिणः शोकमोहयोरुभरपहानिः यो स्यात् । अत्र मनो नाम संकल्पविकल्पात्मिका अन्तःकरणवृत्तिः । 'सर्वेषाꣳ संकल्पानां मन एकायनम्' (बृ. २-४-११) इति श्रुतेः । 'अन्यत्र मना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषम्' (बृ. १-५-३) इत्यादिना मनसः करणत्वमात्रं श्रूयमाणं मनःसाक्षिणस्तद्विविक्तताम् स्फुटयति । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई.७) इति च वेदान्तडिण्डिमेन शोकमोहयोर्मनोऽधिकरणयोरभावो घुष्यते मनःसाक्षिणः । एतेनैव एषणात्रयहानोपायोऽपि दर्शितप्रायः, एषणानामपि मनोधर्मत्वात्, 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' (बृ. १-५-३) इति वेदान्तडिण्डिमादित्यवगन्तव्यम् ॥ ४५ ॥

अथ कर्तृत्वभोक्तृत्वे कथं जह्यात् ? तत्रोत्तरमाचष्टे -

**बुद्धिर्नाहमहं देवो बुद्धिसाक्षीति निश्चयात् ।**
**कर्तृभावनिवृत्तिः स्यादिति वेदान्तडिण्डिमः ॥४६॥**

**बुद्धिः** इति । बुद्धिरिति निश्चयात्मिका अन्तःकरणवृत्तिः । तदविवेकेनैव कर्तृत्वमात्मनः । 'स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' (बृ. ४-३-७) इति श्रुतेः । तस्मान्नाहं बुद्धिः, किं तु चिन्मात्रस्तत्साक्षीति निश्चयात् कर्तृभावनिवृत्तिः स्यात् । एतेन भोक्तृत्वमपि व्याख्यातप्रायम् । ''आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः'' (क. १-३-४) इति तस्यापि बुद्ध्युपाधिकृतत्वोद्घोषणात् वेदान्तडिण्डिमेन । तस्माद् बुद्ध्याद्युपाधिकृतं भोक्तृत्वं सर्वोपाधिसाक्षित्वनिश्चयान्निवर्तते इत्यपि द्रष्टव्यम् ॥ ४६ ॥

ननु 'अखिलातिगं एकं बुद्ध्वा मोक्षमश्नुते' (४१) इत्युक्तं न सङ्गच्छते । देहप्राणमनोबुद्धीनामभावेऽपि सुषुप्तावज्ञानस्य सद्भावदर्शनात्, तस्य च हानोपायाभावात् इत्याशङ्क्य प्रतिविधत्ते-

**नाज्ञानं स्यामहं देवोऽज्ञानसाक्षीति निश्चयात् ।**
**सर्वानर्थनिवृत्तिः स्यादिति वेदान्तडिण्डिमः ॥४७॥**

नाज्ञानम् इति । यद्यपि 'अज्ञानमहम्' इति न भवति कस्यचिदपि बुद्धिः, तथापि 'सुषुप्ते न किञ्चिदवेदिषम्' इति सुप्तोत्थितपरामर्शात्, 'मूढोऽहं नात्मानमपि जानामि' इति व्यवहाराच्च अज्ञानधर्मवानहमिति बुद्धिः स्यादेव । यथा 'देहोऽहम्' इति बुद्ध्यभावेऽपि 'गच्छामि', 'तिष्ठामि', 'लङ्घयामि' - इति रूपेण देहधर्माध्यासो भवति तद्वत् । तत्र देहसाक्ष्यहमित्यादिनिश्चयेन यथा जरामरणाद्यत्ययः, एवम् 'अज्ञानसाक्ष्यहम्' इति निश्चयेन सर्वानर्थनिवृत्तिः स्यात् । सुषुप्ते तावदज्ञानं नास्ति, चिन्मात्रस्वरूपस्यात्मनो द्वितीयवस्त्वभावादेव दर्शनाभावस्य शक्योपपादनत्वात् । 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४-३-२३) इति वेदान्तडिण्डिमघोषणात् । न च दर्शनाद्यभाव एवाज्ञानपदार्थ इति शङ्कनीयम् । अभावस्यापि भावप्रतियोगिनः सुषुप्ते असंभवात् । सुप्तोत्थितपरामर्शबलादेव जागरितदृष्ट्या ज्ञानाभावस्य सुषुप्तावारोपितस्यैव श्रुत्या अनुवाद इति वक्तुं शक्यत्वात् । नापि 'मूढोऽहम्' इति व्यवहारादज्ञत्वसिद्धिः

साक्षिगोचरतया विविच्यमानस्याज्ञानस्य तत्साक्षिधर्मत्वानुपपत्तेः । तदेवमज्ञानसाक्ष्यहं देव इति निश्चयोपपत्तिरिति भावः ॥

'मनःसाक्षीति निश्चयात् । शोकमोहापहानिः स्यात्' (४५) इत्यत्र अज्ञानकार्यस्य मोहस्यैव विविक्तता प्रदर्शिता; अत्र पुनरज्ञानस्वरूपस्यैव साक्षिगोचरतया तद्विविक्तत्वं प्रदर्शितमिति विवेकः । अज्ञानात् कामः, कामात् कर्म, ततः फलभोगस्ततो वासना, ततः पुनरपि कामात्प्रवृत्तिरित्येवं सर्वस्यापि संसारानर्थस्य बीजमज्ञानम् । अतः तद्विवेकेन सर्वानर्थनिवृत्तिः स्यादित्युक्तमिनि बोध्यम् ॥ ४७ ॥

षण्निहत्येत्यस्य विवरणमुपसंहरति -

**अहं साक्षीति यो विद्याद्विविच्यैवं पुनः पुनः ।**
**स एव मुक्तोऽसौ विद्वानिति वेदान्तडिण्डिमः ॥४८॥**

अहम् इति । अहंप्रत्ययगोचर एवात्मेति केचित्, तन्न । यतः सुषुप्त्यादौ नास्त्यहंकारः । तत्साक्षी तु विद्यत एव, सुषुप्त्याद्यनुभवपरामर्शस्य साक्षिबलादेव सिद्धेः । यत्सत्यं सुषुप्तिसमाध्यादिषु साक्षी नानुभूयत इति, तथापि यद्बलात्तादृशावस्थानुभवः स नापन्होतुं शक्यत इति ध्येयम् । अननुभूयमानत्वं तु साक्षिणो न दूषणं, अपि तु भूषणमेव । यस्माद् अनुभूयमानत्वे साक्षित्वमेव व्याहन्येतेति । तस्मादहं 'देहसाक्षी', 'प्राणसाक्षी', 'मनःसाक्षी', 'बुद्धिसाक्षी', 'अज्ञानसाक्षी' इति चैवं विविच्य पुनःपुनः य आत्मानं विद्यात् विजानीयात् स एव मुक्तः, असावेव च विद्वान् इति वेदान्तडिण्डिमः - 'तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्रममृतमिति' (क. २-३-१७) इत्यादिः ॥ ४८ ॥

**नाहं माया न तत्कार्यं तत्साक्षी[1] परमोऽस्म्यहम् ।**
**इति निःसंशयज्ञानान्मुक्तिर्वेदान्तडिण्डिमः ॥ ४९ ॥**

---

1. न साक्षी - दे आ.

नाहम् इति । अहं न माया अविद्याकल्पिता जगतः प्रागवस्था अव्याकृत-नामरूपबीजम् । 'माया', 'अव्याकृतम्', 'अव्यक्तम्', 'अक्षरम्', 'आकाशः', 'ब्रह्म', 'बीजम्', 'शक्तिः', 'प्रकृतिः' - इति पर्यायाः । अहं न माया नापि तत्कार्यं पञ्चभूतानि भौतिकप्रपञ्चश्च । आध्यात्मिककार्यकरणसङ्घात प्रविवेकस्य पूर्वमेव कृतत्वादिहाधिभौतिकः पृथिव्यादिरेव कार्यशब्देन विवक्ष्यते । यद्यपि न कोऽप्यहं मायेति तत्कार्यभूतः प्रपञ्च इति वा अभिमन्यते । तथापि, मायाकार्यभूत प्रपञ्चान्तर्गत पशुहिरण्यक्षेत्रप्रभृतीन्यात्मसम्बन्धीनि मत्वा, तदुपचयापचयाभ्यामात्मनोऽप्युपचयमपचयम् वा मन्यते संसारिजन इति सुप्रसिद्धमेतत् । अतस्तत्साक्षित्वानुसन्धानपूर्वकम् तादृशाभिमानत्यागः कर्तव्य इत्यभिप्रायः । एतदुक्तं भवति - यदा खलु स्वात्मनोऽत्यन्तसमीपतयाभ्युपगता देहेन्द्रियप्राणमनोबुद्धयः एव अनात्मत्वेन बहिष्कृताः, तदा कैव कथा अत्यन्तविप्रकृष्टेषु क्षेत्रवित्तादिष्वात्मबुद्धेरिति । एवं मायासाक्षी अहं परमात्मैव - इति निःसंशयज्ञानान्मुक्तिरिति वेदान्तडिण्डिमः । 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे. १-१०) इत्यादिः ॥

'न साक्षी परमोऽस्म्यहम्' इति क्वचित्पाठः । तदा त्वेवं व्याख्येयम् - साक्षिगोचरस्य सर्वस्यापि मायिकत्वात् साक्षित्वमपि मयि परमार्थतो नास्ति, यतः परमोऽस्म्यहं 'अयमात्मा ब्रह्म' (बृ.२-५-१९) इति हि वेदान्तडिण्डिम इति ॥४९॥

अथ "हित्वा षट् पञ्चभित्त्वाथ" (४२) इति द्वितीयश्लोकस्य व्याख्यानमारभते । तत्र कामक्रोधादिकृतं दुःखं कथं हातव्यमित्यत आह-

**नाहं सर्वमहं सर्वं मम सर्वमिति स्फुटम् ।**
**ज्ञाते तत्त्वे कुतो दुःखमिति वेदान्तडिण्डिमः ॥५०॥**

नाहम् इति । अहं न सर्वम्, सर्वसाक्षित्वात्; साक्षिगोचरस्य च साक्षि-धर्मत्वानुपपत्तेः । अहमेव च सर्वम्, मद्व्यतिरिक्तस्य अन्यस्याभावात् । न हि कस्यचिदपि चैतन्यसम्बन्धरहिता सत्ता विद्यते ; सर्वस्यापि ज्ञाततया अज्ञाततया वा नियमेन तत्सम्बन्धादिति भावः । अत एव मम सर्वं न पुनरहं सर्वस्य । यद्धि

यदधीनं तत्तस्येत्युच्यते मुख्यया वृत्त्या, यथा राज्ञः पुरुषः, श्रेष्ठिनः पशुः इति । मच्चैतन्याधीनं च सर्वमतो ममैव सर्वम् । इति तत्त्वे ज्ञाते सति, कुतो दुःखम् ? इष्टस्याप्राप्त्या, अनिष्टस्य च संप्राप्त्या हि दुःखं भवति । अयं तु सर्वसाक्षितां सर्वस्य च स्वायत्ततां पश्यन् कुतो दुःख्येदिति भावः । इति वेदान्तडिण्डिमः - 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳसर्वं यदयमात्मा' (बृ. २-४-६) इति, 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते' (ई. ६) इति चैवमादिः ॥५०॥

अथ पञ्चकोशपञ्चभूतप्रविवेकेणात्मतत्त्वनिर्धारणमार्गं दर्शयन्, 'पञ्च भित्त्वा' इत्येतद्विवृणोति-

**देहादिपञ्चकोशस्था या सत्ता प्रतिभासते ।**
**सा सत्तात्मा न सन्देह इति वेदान्तडिण्डिमः ॥५१॥**

**देहादि०** इति । देहप्राणमनोबुद्ध्यहंकारा देहादयः । देहादय एव पञ्चकोशाः अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्याः ते चासेः कोशवदात्मतत्त्वस्याच्छादनात्कोशा उच्यन्ते । तेषु पञ्चकोशेषु तिष्ठन्तीव या सत्ता देहादिपञ्चकोशस्था सा सत्ता आत्मैव । न सन्देहः । आत्मसत्ता वा सा आहोस्वित् तार्किकपरिकल्पिता जात्यादिनिमित्तावेति संशयो न कर्तव्य इत्यभिप्रायः ॥

अत्रेदं बोध्यम् । तार्किका द्रव्यगुणसामान्यविशेषसमवायाख्याः षड्भावपदार्था इति स्वीकृत्य, द्रव्यगुणकर्मस्वनुगतं परसामान्यं सत्तेत्याहुः । प्राभाकरास्तु संस्थानमात्रव्यङ्ग्यसामान्यं द्रव्यगतमेव न गुणकर्मगतमपीत्याहुः । सामान्यं जातिरिति च पर्यायशब्दौ । सिद्धान्ते तु न सत्तासामान्ये प्रमाणमस्ति । आत्मचैतन्यविषयत्वेनैव सर्वस्यापि भासमानत्वात्, चैतन्यसत्तातिरेकेण सत्तान्तरङ्गीकारे कारणाभावात् । प्रतीत्यनुसारेण विषयेऽपि काचिदन्या सत्ता अङ्गीकर्तव्येति चेत् ।

तदा मृगतृष्णिकादावपि सत्तान्तराभ्युपगमः प्रसज्येत, तत्रापि सज्जलम्,

सद्रजतम्, सन् सर्प इत्यादि प्रतीतेरिति । तस्मादात्मसत्तैव शरीरादिस्थसत्ता । 'सन्मूलाः सोम्येमाः सर्वाः प्रजा सदायतनाः सत्प्रतिष्ठा'' (छा. ६-८-४) इति हि वेदान्तडिण्डिमः ॥ ५१ ॥

**देहादिपञ्चकोशस्था या स्फूर्तिरनुभूयते ।**
**सा स्फूर्तिरात्मा नैवान्यदिति वेदान्तडिण्डिमः ॥५२॥**

**देहादि०** इति । एवं देहादिषु या स्फूर्तिः सा स्फूर्तिरात्मैव नान्या । आत्मचैतन्यस्य सदा भानात्, जागरिते भासमानस्य देहादेः स्वप्ने भासमानस्य देहाद्याभासस्य च चैतन्यविषयत्वेनैव भानात्, तद्व्यतिरेकेण भानान्तरकल्पने गौरवाच्च । न हि जानामीति ज्ञानभानातिरेकेण विषयभानमन्यत्कदाप्यनुभूयते । इति वेदान्तडिण्डिमः- 'आत्मैवास्य ज्योतिः' (बृ.४-३-६) 'तमेव भान्तमनुभाति सर्वम्' (मु. २-२-१०) इत्यादिरूपः ॥ ५२ ॥

**देहादिपञ्चकोशस्था या प्रीतिरनुभूयते ।**
**सा प्रीतिरात्मा कूटस्थ इति वेदान्तडिण्डिमः ॥ ५३ ॥**

**देहादि०** इति । एवं देहादिगतं प्रेमाप्यात्मगतमेव, तस्यैव नित्यप्रेमास्पदत्वात् । आत्मबुद्ध्यारोपादेव हि देहादौ प्रेम दृश्यते, अनारोपितात्मभावस्य व्रणक्लिन्नादिदेहभागस्य छेदेनापि संतोषलाभदर्शनात् 'आत्मनस्तु कामाय सर्वं प्रियं भवति' (बृ. २-४-५), 'रसो वै सः' (तै. २-७) - इत्यादिश्च श्रुतिडिण्डिम एतदेव घोषयति ॥

यद्यपि देहादिगता प्रीतिरुत्कर्षापकर्षवत्त्वादनित्यत्वाच्च नात्मा भवितुमर्हतीति शङ्का भवति । तथापि, पूर्वार्जितशुभकर्मणा यावद्यावन्निर्मलीकृतमन्तःकरणं तावत्तावत्प्रसन्नं भवति तत्, तस्मिंश्चाभिव्यक्तम् आनन्दस्वरूपमुत्कर्षापकर्षाद्विदवानित्यमिव चावभासते, नित्यनिर्विकारमेव सदपीत्याशयेनाह **'कूटस्थ'** इति । कूटो राशिः पर्वतादिः । तदिव स्थितः, अचलो निर्विकार इत्यर्थः । कूटस्थानन्दस्वरूप एव विषयानन्दरूपेण प्रीत्यास्पदो भवति ।

'न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान् मुदः प्रमुदः सृजते'' (बृ. ४-३-१०) इति श्रुत्युक्तदिशा तस्यैव लौकिकानन्दस्रष्टृत्वदर्शनात् स्वप्ने, 'एषोऽस्य परमानन्दः' (बृ. ४-३-३२) इत्युक्तदिशा सुषुप्ते कूटस्थानन्दस्वरूपानुभवाच्चेति भावः ॥ ५३ ॥

तदेवं कार्यरूपेषु पञ्चकोशेषु विद्यमानमिव गृह्यमाणं सच्चिदानन्दत्वमात्मन एवेति प्रदर्श्य, इदानीं कारणरूपेषु पञ्चभूतेष्वपि गृह्यमाणं तदात्मन एवेति दर्शयति त्रिभिः -

**व्योमादिपंचभूतस्था या सत्ता भासते नृणाम् ।**
**सा सत्ता परमं ब्रह्म इति वेदान्तडिण्डिमः ॥ ५४ ॥**

**व्योमादिपञ्चभूतस्था या चिदेकानुभूयते ।**
**सा चिदेव परं ब्रह्म नान्यद्वेदान्तडिण्डिमः ॥ ५५ ॥**

**व्योमादिपञ्चभूतस्था या प्रीतिरनुभूयते ।**
**सा प्रीतिरेव ब्रह्म स्यादिति वेदान्तडिण्डिमः ॥ ५६ ॥**

**व्योमादि** इति । यथाध्यात्मं देहादिपञ्चकोशसत्तास्फूर्तिप्रीत्याख्यं त्रयमप्यात्मन एव नान्यस्य । एवं अधिभूतम् आकाशवाय्वग्निजलपृथिवीगतमपि तदात्मन एव ; आत्मसत्तास्फूर्तिप्रीतिव्यतिरेकेणाभावादिति श्लोकत्रयस्य पिण्डितार्थः । तथा हि वेदान्तडिण्डिमो माण्डूक्यादौ । 'अयमात्मा ब्रह्म' (मा. २) इति प्रकृत्य जागरितस्थानस्यैव द्युलोकाद्यङ्गवत्त्वकथनेन वैश्वानरेणैकत्वं प्रदर्शयति 'जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः' (मां. ३) इति । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै. २ -१) इति ब्रह्मण एवाकाशादिकारणस्य आत्मत्वेन प्रदर्शनम् । 'तत्सत्यं स आत्मा' (छा. ६-८-७) इति च । अत एव पृथिव्यादिषु शरीरे चात्मा एक एव, स एव च सर्वमिदमिति घुष्यते वेदान्तडिण्डिमैः 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम्' (बृ. २-५-१) इत्यादिभिः ॥ ५६ ॥

न चैवं मन्तव्यं देहादिसत्तादिभ्यो भिन्ना एव व्योमादिगताः सत्तादय इति । यत आह -

**देहादिकोशगा सत्ता या सा व्योमादिभूतगा ।**
**मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः ॥ ५७ ॥**

**देहादिकोशगा स्फूर्तिर्या सा व्योमादिभूतगा ।**
**मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः ॥ ५८ ॥**[1]

**देहादिकोशगा प्रीतिर्या सा व्योमादिभूतगा ।**
**मानाभावान्न तद्भेद इति वेदान्तडिण्डिमः ॥ ५९ ॥**[1]

**देहादि** इति । या देहादिगता सत्ता सैव व्योमादिगता । प्रपञ्चार्थमेव पृथग्विचारः कृत इति भावः । अत्रेदं बोध्यम् - देहाद्भिन्नस्य बाह्यवस्तुनः स्फुटं सिद्धमनात्मत्वम् । तथा साक्षिणोऽप्यात्मता स्वतःसिद्धा ; मध्ये स्थितानां देहादिपञ्चकोशानां त्वात्मबुद्ध्या अनात्मबुद्ध्या च ग्रहणात् संशयः । तत्र यथा व्योमादिरिदंबुद्धिगृहीतत्वादनात्मा तथैव देहादिरपि । यथा व्योमादिगता सत्ता पृथगिवावभासते, अथ च जागरितावस्थामात्रपरिच्छिन्ना तत्सत्ता, एवमेव देहादिगता सत्तापीति ॥

सेयं सत्ता आत्मचैतन्यप्रयुक्तैव, तथैव प्रतिभासात् । न च सत्ताद्वयमेव किं न स्यादिति शङ्कनीयम् । यतः सत्तयोर्द्वयोर्भेदो सत्ताद्वयातिरेकेण अस्ति वा न वा ? अस्ति चेत्सत्तात्रैविध्यापत्तिः । तत एव चातुर्विध्यमित्यादि युक्तिबलादनवस्था । अथ नास्ति भेदस्तयोः । न तर्हि सत्ताद्वैविध्यम् । अपि च यस्य सत्ता परापेक्षयैव, तस्य परमार्थतोऽसत्तैव युक्ता । न चात्मन एव सापेक्षा सत्ता । सुषुप्तिसमाध्यादौ तस्य निरपेक्षसद्भावदर्शनात् । न चास्ति सत्तायां कश्चिद्विशेष अनुभूयमानः, येन अनात्मनोऽपि सत्तान्तरमभ्युपगम्येत । तदेतत्सर्वं मनसि निधायाह - 'मानाभावान्न तद्भेदः' इति । अस्मिन्नर्थे वेदान्तडिण्डिमोऽपि भवति "सत्यं चानृतं च सत्यमभवत्" (तै. २-६) इत्यादिः ॥

---

1. आ. पुस्तके श्लोकद्वयमिदमधिकं दृश्यते ।

उपलक्षणं चैतत् स्फूर्तिसुखयोरैक्ये । तत्रापि भेदे मानाभावात् । पठ्यते च क्वचिदेतदर्थकं श्लोकद्वयम् - 'देहादिकोशगा स्फूर्तिः' इत्यादि, 'देहादिकोशगा प्रीतिः' इत्यादि च ॥ ५९ ॥

तदेवं 'पञ्च भित्त्वा' इति व्याख्यातम् । 'गत्वाग्रे चतुरस्त्रिकम्' इति तु न व्याख्यानम् अपेक्षते, विवेकवैराग्यादीनां श्रवणादीनां च प्रागेव वर्णनात् । अतो द्वयं हित्वा' (४२) इत्येतस्य व्याख्यानमारभते -

**सच्चिदानन्दरूपत्वाद्ब्रह्मैवात्मा न संशयः ।**

**श्रुतिप्रमानुसन्धानादिति[1] वेदान्तडिण्डिमः ॥ ६० ॥**

**सच्चिदानन्द०** इति । आत्मा ब्रह्मैव । कुतः ? सच्चिदानन्दरूपत्वात् । ब्रह्म तावत् सच्चिदानन्दरूपमित्यवगतम् 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.२-१) 'विज्ञानमानन्दं ब्रह्म' (बृ.३-९-७) - इत्यादिश्रुतिभ्यः । आत्मा च सच्चिदानन्दरूपोऽवगतः, यथोक्तश्रुतियुक्तिभ्यः । तस्मादात्मा ब्रह्मैव, नात्र संशयः कर्तव्यः । एतदपि श्रुतिप्रमाण्यावगतमित्याह - 'श्रुतिप्रमानुसन्धानात्' इति । श्रुतिजनिता प्रमा अनधिगताबाधितार्थविषयकं ज्ञानं श्रुतिप्रमा ; तस्या अनुसन्धानात् । वेदान्तार्थश्रवणमनननिदिध्यासनेभ्य एवमवसीयत इति भावः । तथा च वेदान्तडिण्डिमः - 'तत्त्वमसि' (छा. ६-८-७), 'अहं ब्रह्मास्मि' (बृ. १-४-१०), 'अयमात्मा ब्रह्म' (मां. २) इत्यादिरूपः ॥ ६० ॥

उक्तार्थे बाधकप्रत्ययो नास्त्येव, यस्मात् -

**न जीवब्रह्मणोर्भेदः सत्तारूपेण विद्यते ।**

**सत्ताभेदे न मानं स्यादिति वेदान्तडिण्डिमः ॥ ६१ ॥[2]**

**न जीवब्रह्मणोर्भेदः स्फूर्तिरूपेण विद्यते ।**

**स्फूर्तिभेदे न मानं स्यादिति वेदान्तडिण्डिमः ॥ ६२ ॥**

---

1. 'श्रुतिप्रमाणसन्धानात्' - क. ; 'प्रमाणकोटिसन्धानात्' - आ.

2. अयं श्लोक आ. कोशमात्रे दृश्यते । विचारसरण्यां त्वावश्यक एव ॥

**न जीवब्रह्मणोर्भेदः प्रियरूपेण विद्यते ।**
**प्रियभेदे न मानं स्यादिति वेदान्तडिण्डिमः ॥ ६३ ॥**

न इति । जीवब्रह्मणोर्भेदः सत्तारूपेण न विद्यते, सत्ताभेदे मानाभावात् । न हि सत्त्वाविशेषे सति सत्ताभेदो युज्यते । सद्भिन्नस्य चासत्त्वमेव युक्तमिति । नापि स्फूर्तिरूपेण तयोर्भेदः, चितः सकाशाच्चिदन्तरस्य विशेषानवगमात् । चिद्भिन्नं ह्यचिदेव स्यान्न चित् । न च चिद्द्रव्यं चिद्गुणकं भवेदतो द्रव्यगुणयोर्भेदः, चिद्द्रव्यस्य चैकस्य द्रव्यान्तराद्भेदः स्यादेव गुणोत्कर्षापकर्षकृत इति शङ्कनीयम् । द्रव्यगुणादिविकल्पस्य चिद्विषयभूतजडपदार्थमात्रे दृष्टस्य विषयिभूतायां चितावसंभवात् । चिदेव च वस्तुषु स्फूर्तिशब्दवाच्या न पदार्थान्तरमिति सिद्धं न स्फूर्तिरूपेणापि जीवब्रह्मणोर्भेदो विद्यत इति । नापि प्रियत्वरूपेण जीवब्रह्मणोर्भेदः । आत्मनः सर्वस्मादपि प्रियतरत्वे सिद्धे आत्मनोऽन्यस्य निरुपचरितपरमप्रेमास्पदत्वासिद्धेः । ब्रह्मणि च श्रुत्यन्तेष्वात्मशब्दप्रयोग-दर्शनादानन्दरूपत्वमविरुद्धम् । तदेवं सत्तास्फूर्तिप्रियरूपेण जीवब्रह्मणोर्भेदो न सिध्यतीति श्लोकत्रयार्थः ॥ ६३ ॥

यद्यपि जीवब्रह्मणोः सच्चिदानन्दरूपत्वेन भेदो नास्ति, तथापि नामरूपाभ्याम् भेदो भविष्यति । तथा हि नाम्ना एको जीवः प्राणधारणकर्ता, अपरस्तु ईश्वरः सर्वभूतानामीशनशीलः । रूपेण चैकः कर्ता भोक्ता संसारी च, अपरस्तु नित्यमुक्तः सर्वदोपास्यः सर्वजीवैः आदित्यादिमण्डलेषु हिरण्यश्मश्रुत्वादि श्रुत्युक्तरूपवांश्च । इत्याशङ्क्याह-

**न जीवब्रह्मणोर्भेदो नाम्ना रूपेण विद्यते ।**
**नाम्नो रूपस्य मिथ्यात्वादिति वेदान्तडिण्डिमः ॥६४॥**

**न जीव०** इति । नैष भेदो विद्यते । कुतः ? नाम्नो रूपस्य च मिथ्यात्वात् अविद्याकृतप्रतीतिमात्रत्वादिति यावत् । यत एवं भवति वेदान्तडिण्डिमः 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः' (बृ. २-८-५) इति, 'स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य । स सर्वज्ञः सर्वो भवति'

(प्र.४-१०) इति, 'एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते' (प्र. ६-५) इति च ॥ ६४ ॥

ननु कथं नामरूपयोर्मिथ्यात्वम् ? न हि प्रत्यक्षमनुभूयमानयोस्तयोरपलापः संभवति । दृश्यते हि चैत्रमैत्रयोर्भेदो नामरूपविशेषकृतः । इत्यत आह-

**न[1] नामरूपे नियते सर्वत्र व्यभिचारतः ।**
**अनामरूपः सर्वः स्यादिति वेदान्तडिण्डिमः ॥ ६५ ॥**

न नामरूपे० इति । नामरूपे न जीवानां सर्वत्र नियते । कुतः ? व्यभिचारतः । अव्यभिचरितरूपत्वं हि सत्यत्वकारणम् । न च नामरूपे नियते स्तः कस्यचिदपि जीवस्येश्वरस्य वा । जीवस्य तावत् स्वप्ने जागरिते चान्यादृशयोरेव नामरूपयोः प्रतिभासः, सुषुप्तौ चात्यन्तमप्रतिभासश्चेति सार्वजनीनमेतत् । तस्मादनामरूपः परमार्थतो जीवः । एवमीश्वरोऽपि । उपासकानुग्रहार्थमेव हि तेन नानारूपग्रहणम् । तस्मादनियतत्वं, मायिकत्वं च तद्रूपस्यापि । परमार्थतस्तु निरुपाधिकत्वादरूपत्वमेव तस्यापीति निश्चीयते । 'अशब्दमस्पर्षमरूपम् ' (क. १-३-१५) इति च श्रुतेः ॥

अतो नोक्तदोषः । नामरूपनैयत्याभावादेव च न जीवनानात्वम्, येन अनेकेषां जीवानामेकेन ब्रह्मणा कथमैक्यमिति शङ्क्येत । तस्मान्नामरूपाभ्यां न जीवब्रह्मणोर्भेद इति सुस्थम् ॥

तथा हि वेदान्तडिण्डिमः - 'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' (छा. ६-८-१) इति सुषुप्तौ सकलनामरूपरहितायामवस्थायाम् जीवस्य स्वरूपे सम्पत्तिं ब्रुवती श्रुतिः नामरूपयोरनियतत्वम् दर्शयति । 'तथा विद्वान्नाम-रूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' (मु. ३-२-८) इति विदुषो नामरूप-

1. ''ब्रह्म सत्यं'' (६८) इति श्लोकानन्तरमस्य पाठः - आ. ; ''सच्चिदानन्दरूपत्वात्'' (६०) इत्यस्यानन्तरं पाठः । - दे.

विमोक्षं ब्रुवती नामरूपयोरविद्याकृतत्वं प्रख्यापयति । तथा 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते' (तै.आ.३-१२-७) इति च परस्यापि सर्वनामरूपनिर्मातृत्वकथनेन स्वतो नामरूपराहित्यमेव दर्शयतीति ॥ ६५॥

ननु जीवस्तावदल्पज्ञोऽल्पशक्तिश्च, शारीरत्वात् । ईश्वरस्तु सर्वज्ञः सर्वशक्तिश्च, सर्वब्रह्माण्डसृष्टिस्थितिसंहारकर्तृत्वात् । तस्मान्मेरुसर्षपयोरिव भेदे जाग्रति सति, कथमभेदो घटते ? तत्राह-

**न जीवब्रह्मणोर्भेदः पिण्डब्रह्माण्डभेदतः ।**
**व्यष्टेः समष्टेरेकत्वादिति वेदान्तडिण्डिमः ॥ ६६ ॥**

न जीव० इति । पिण्डं शरीरम्, ब्रह्माण्डं सकलं जगत् । तयोर्भेदतोऽपि न जीवब्रह्मणोर्भेदः सिध्यति । कुतः ? व्यष्टेः समष्टेरेकत्वात् । पिण्डं व्यष्टिः, ब्रह्माण्डं समष्टिः । न च व्यष्टिसमष्ट्योर्भेदः पारमार्थिकः, व्यष्टीनामेव समुदितानां समष्टिशब्दभाक्त्वात् । व्यष्टिसमष्टिसाक्षिणश्चैकत्वात् नानात्वे न मानमस्ति । इदमुपलक्षणम्, तयोर्मिथ्यात्वस्यापि । उक्तं च पूर्वमेव 'नाम्नो रूपस्य मिथ्यात्वादिति' (६४) ॥

एतदर्थेऽप्यस्ति वेदान्तडिण्डिमः - 'नवद्वारे पुरे देही हंसो लेलायते बहिः । वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च' (श्वे.३-१८) इति, 'जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः' (मां.३) इति चैवमादिः ।

षष्ठश्लोके चैतन्याद्वैतवादेऽपि जीवेश्वरव्यवहार उपपद्यत इत्येतावन्मात्रं दर्शितम् । अत्र तु व्यष्टिसमष्ट्योरेकत्वात्तत्कृतभिदा न वास्तवीत्युच्यते इति न पौनरुक्त्यं पूर्वापरविरोधो वेत्यवगन्तव्यम् ॥ ६६ ॥

एतावता ग्रन्थभागेन 'द्वयं हित्वा' इत्येतद्व्याख्यातम् । अथ "आश्रयेदेकम्" इति यदुक्तं (४२) तद्विवृणोति-

**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।**
**जीवन्मुक्तस्तु तद्विद्वानिति वेदान्तडिण्डिमः ॥ ६७ ॥**

**ब्रह्म०** इति । ब्रह्म सच्चिदानन्दरूपं नित्यशुद्धबुद्धमुक्तमेकमेव परमार्थसत्यम्, अव्यभिचारादात्मस्वरूपत्वात् । जगत्तु नामरूपात्मकमनेक-कर्तृभोक्तृयुतं, प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयं, प्रत्यक्षादिप्रमाणवेद्यम्, मिथ्यामायाप्रतीतिमात्रशरीरम् ; न परमार्थसत्यम्, व्यभिचरत्स्वरूपत्वात् । जीवश्च प्राणधारणकर्ता कर्तृभोक्तृस्वरूपेण प्रतीयमानः शारीरात्मा ब्रह्मैव अकर्तृभोक्तृस्वरूपाद्वितीयचिदात्मैव, न संसारी । तद्विद्वांश्च अद्वितीयब्रह्मात्मज्ञानी जीवन्मुक्त एव, लोकदृष्ट्या संसारिवदेव जीवन्नपि स्वदृष्ट्या मुक्त एव सर्वसंसारधर्मविवर्जितः । इति वेदान्तडिण्डिमः - 'तत्सत्यं स आत्मा तत्त्वमसि' (छां.६-८-७), 'नेह नानास्ति किञ्चन' (क.२-१-११), 'अथ सोऽभयं गतो भवति' (तै.२-७), 'अशरीरꣳशरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (क. १-२-२२), 'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ.४-४-७) इति चैवमादिः ॥६७॥

**अनामरूपं सकलं सन्मयं चिन्मयं प्रियम् ।**
**कुतो भेदः कुतो बन्धः इति वेदान्तडिण्डिमः ॥ ६८ ॥**

**अनाम०** इति । सकलं सुरनरतिर्यगादिभेदेन प्रतीयमानं परमार्थदृष्ट्या अनामरूपं नामरूपरहितं ब्रह्मैव । यस्मादिदं सर्वं सन्मयं चिन्मयं प्रियं सच्चिदानन्दस्वरूपमेव । सच्चिदानन्दरूपब्रह्मण एवोत्थितत्वात्, तत्रैव स्थितत्वात्, तत्रैव चान्ते विलयाच्च, तत्रैवमद्वितीयत्वे सति कुतो भेदः; कुतो वा भेदकृतो बन्धः ? इति वेदान्तडिण्डिमः । 'सर्वं खल्विदं ब्रह्म, तज्जलान्'(छा.३-१४-१), 'सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च, विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किं च' (तै. २-६) इत्यादिः ॥६८॥

स्यादेतत् - सच्चिदानन्दरूपेण नामरूपाकारेण च ब्रह्मैव चेत्प्रतिभासते तत्र कुत एतत्सच्चिदानन्दरूपमेव सत्यं न तु नामरूपे इति? तत्राह-

**न सत्यः[1] कथ्यते लोको नामादेर्व्यभिचारतः[2] ।**
**वटुः कुलट[3] इत्यादेरिति[4] वेदान्तडिण्डिमः ॥६९॥**

न सत्य इति । अयं नामरूपात्मको लोको वटुः कुलट इत्यादेर्नामादे र्व्यभिचारतः व्यभिचरत्स्वरूपत्वात् न सत्यः कथ्यते । यथा हि सच्चिदानन्दरूपं ब्रह्मणो न व्यभिचरति किं तु सदैकरूपम्, न तथा नामरूपे । तद्यथा य एव वटुर्ब्रह्मचारीति कथ्यते स एव कालान्तरे अवस्थान्तरे वा कुलटः स्वैरिणीरत इत्युच्यते । तस्मान्न सत्यः कथ्यते लोकः । 'वाचारम्भणं विकारो नामधेयम्' (छा. ६-१-४) इत्यादिवेदान्तडिण्डिमादिति भावः ॥ ६९ ॥

**नामरूपात्मकं विश्वमिन्द्रजालं विदुर्बुधाः ।**
**अनामत्वादरूपत्वादिति[5] वेदान्तडिण्डिमः ॥ ७० ॥**

नामरूपं इति । बुधाः ब्रह्मात्मज्ञानिनो व्यासादयः नामरूपात्मकं विश्वमिन्द्रजालं मायोपमं विदुः । युक्तिहीनप्रकाशत्वात्, वस्तुतो ब्रह्मणोऽनामत्वादरूपत्वाच्च । 'तमः श्वभ्रनिभं दृष्ट्वा वर्षबुद्बुदसन्निभम्' (मो. ३०१-६०), 'परमार्थस्त्वमैवेको नान्योऽस्ति जगतः परः* । तवैष महिमा येन व्याप्तमेतच्चराचरम् । यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव । भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥' (वि. पु. १-४-३८) इत्यादिस्मृतेः । अत एव 'य एको जालवानीशत ईशनीभिः' (श्वे. ३-१) 'भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे. १-१०), 'यतो वाचो निवर्तन्ते' (तै. २-९), 'न संदृशे तिष्ठति रुपमस्य'' (ना. २) इत्यादिर्वेदान्तडिण्डिमः ॥ ७० ॥

तदेवं जीवब्रह्मणोर्जगद्ब्रह्मणोर्वा पारमार्थिकभेदाभावात् -

**अभेददर्शनं मोक्षः संसारो भेददर्शनम् ।**
**सर्ववेदान्तसिद्धान्त इति वेदान्तडिण्डिमः ॥ ७१ ॥**

1. तत्त्वात् - आ. दे. 2. नामाद्यैः - आ. दे
3. जरठ - आ. दे. 4. इत्याद्यैः - आ. दे.
5. अयुक्तत्वात् - आ. दे. *. 'जगतःपते' इति पाठान्तरम् प्रकाशकः ।

**अभेद०** इति । अभेददर्शनं मोक्षः ईश्वरजीवजगतां ब्रह्मरूपेण दर्शनमेव मोक्षहेतुः । भेददर्शनं तु संसारहेतुः । इति सर्वेषां वेदान्तानां सिद्धान्तः । 'एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति' (श्वे. ३-१०), 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'(बृ.४-४-१९),- इत्यादिडिण्डिमेभ्यः ॥७१॥

तदेतदभेददर्शनं चित्तशुद्धिपूर्वकं सम्यगनुष्ठितेन श्रवणमनननिदिध्यासन साधनेनैव लभ्यम्, न तु वृथाभिमानादित्याह-

**न मताभिनिवेशेन[1] न भाषावेषमात्रतः[2] ।**
**मुक्तिर्विनात्मविज्ञानमिति[3] वेदान्तडिण्डिमः ॥७२॥**

**न मत०** इति । न मताभिनिवेशेन 'अहमद्वैती' इत्यभिमानमात्रेण मुक्तिः स्यात् । 'न नाम्नाभिनिवेशेन' इति क्वचित्पाठः । तत्र 'वेदान्ती', शास्त्री' - इत्यादि नामधारणमात्रेण न मुक्तिः, न वा केवलाद्वैताभिनिवेशेन मुक्तिरित्यर्थः । नापि भाषावेषमात्रतः । भाषा आत्मानात्मसत्यमिथ्येत्यादिशब्दप्रयोगः, वेषः काषायवस्त्रमौण्ड्यादियुक्तत्वम् । न तन्मात्रेण मुक्तिः किन्त्वात्मविज्ञानादेव मुक्तिः स्यात् । तथा च वेदान्तडिण्डिमः - 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥' (श्वे. ६ - २०) इति । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' (मुं. ३-२-३) इति च ॥ ७२ ॥

वर्णितमुक्तौ कस्य वाञ्छा समुदेति, यदनन्तरमेव जिज्ञासा कर्तव्या भवेदित्यत आह-

**न काम्यप्रतिषिद्धाभिः क्रियाभिर्मोक्षवासना ।**
**ईश्वरानुग्रहात् सा स्यादिति वेदान्तडिण्डिमः ॥ ७३ ॥**

**न काम्य०** इति । नित्यनैमित्तिककाम्यप्रतिषिद्धभेदेन चतुर्विधानि वैदिककर्माणि । तत्र काम्यानुष्ठानात् स्वर्गादिफलसिद्धिः, प्रतिषिद्धानुष्ठानात्

1. मताभिनिवेशित्वात् - आ. दे. 2. भाषावेशमात्रतः - आ.दे.
3. विनात्मविज्ञानात् - आ. दे.

स्थावरान्ता अधोगतिः। तस्मात् काम्यप्रतिषिद्धकर्मभिरनुष्ठितैः संसारवासनैव वर्धते। अतो न काम्यप्रतिषिद्धाभिः क्रियाभिर्मोक्षवासनासंभवः। नित्यनैमित्तिकैस्तु भगवदर्पितैश्चित्तशुद्धिद्वारा मोक्षवासना संजायते। यत ईश्वरानुग्रहादेव सा मोक्षवासना भवति इति वेदान्तडिण्डिमः - 'स कामभिर्जायते तत्र तत्र' (मुं. ३-२-२), ''नाविरतो दुश्चरितात्'' (क. १-२-२४), 'तꣳह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' (श्वे. ६-१८) - इति च॥ ७३॥

अतः प्राप्तमोक्षवासनाभिरवश्यं ब्रह्मज्ञानाय प्रयतितव्यम्। न च निष्प्रयोजनं सुदुःसम्पादं वा ब्रह्मज्ञानम्। यतः -

**अविज्ञाते जन्म नष्टं विज्ञाते जन्म सार्थकम्।**

**ज्ञातुरात्मा न दूरे स्यादिति वेदान्तडिण्डिमः ॥७४॥**

**अविज्ञाते** इति। अस्मिन् ब्रह्मात्मन्यविज्ञाते जन्म नष्टम्, सर्वाधिकस्य आत्मलाभस्यासंपादितत्वात्। विज्ञाते तु तस्मिन् जन्म सार्थकम्। परमपुरुषार्थस्य संपादितत्वात्। न च बहुलायासलभ्यं तज्ज्ञानम्, यतो ज्ञातुरात्मा न दूरे स्यात्। नह्ययममृतस्वरूप आत्मा जिज्ञासोः स्वरूपाद्व्यवहितो येन तत्प्राप्तौ स्यादपि कश्चिदायासः। तदेवं प्रत्यक्षफलत्वात्, नित्यफलत्वात् प्राप्तुं सुसुखत्वाच्च अवश्यं मुमुक्षुभिर्ज्ञानाय यतितव्यमिति भावः॥

अत्र भवति वेदान्तडिण्डिमः - 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः' (के. २-५), 'ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति' (बृ. ४-४-१४) इति, 'तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम्' (मुं. ३-१-७) - इति च॥ ७४॥

'नायासस्तत्त्वविज्ञप्तौ' (१७) इत्युक्तं प्राग्यत्तदनूदितमतीतानन्तरश्लोके। अथैतदेव प्रपञ्चयति दृष्टान्तकथनेन-

**दशमस्य परिज्ञाने नायासोऽस्ति यथा तथा।**

**स्वस्य ब्रह्मात्मविज्ञान इति वेदान्तडिण्डिमः ॥ ७५ ॥**

दशमस्य० इति । अत्रेयमाख्यायिका - दशपुरुषाः किल कश्चिद्ग्रामान्तरं प्रस्थिता नदीं पूर्णप्रवाहां तीर्त्वा पुनरेकत्र मिलिताः सर्वे वयं सुरक्षितं तीर्णा वा न वेति विमृश्य परिगणनाय प्रवृत्ताः । तेष्वेकैकोऽतिमूढः स्वव्यतिरिक्तनवपुरुषान् वीक्षमाणस्तत्संख्यापहृतचित्तत्वात् स्वात्मानं दशमं न वेत्ति, शोचति च "अहो बत हतो नद्यां दशम" इति । ततः कश्चित्पान्थो विदितवृत्तान्तः सानुकम्पं तं प्रतिबोधयति - दशमस्त्वमेवेति । तत्रास्मिन् दृष्टान्ते यथा दशमस्य परिज्ञाने नायासोऽस्ति स्वरूपत्वात्तस्य, तथा अत्रापि स्वातिरिक्तानात्मव्यापृतचित्ततया स्वात्मानमविजानतः जिज्ञासोः स्वात्मरूपस्य श्रुत्याचार्यस्मारितब्रह्मात्मनो विज्ञाने न कश्चिदायासोऽस्तीति भावः । तथा च वेदान्तडिण्डिमः 'तत्सत्यं स आत्मा तत्त्वमसि' (छा. ६-१४-३) इति, 'तद्धास्य विजज्ञौ' (छा.६-१६-३) इति चैवमादिः ॥ ७५ ॥

**उपेक्ष्यौपाधिकान् दोषान् गृह्यन्ते विषया यथा ।**
**उपेक्ष्य दृश्यं तद्ब्रह्म[1] इति वेदान्तडिण्डिमः ॥७६॥**

उपेक्ष्य इति । यथा विषयाः शब्दादयः औपाधिकान् उपाधिकृतान् दोषान् उपेक्ष्य गृह्यन्ते । तद्यथा कामलादिदोषेण गृहीते शङ्खादौ प्रतीतमपि पीतत्वादिकमुपेक्ष्य यथा शङ्खादिर्गृह्यते, ज्वरादिपीडितस्य जिह्वायां प्रतीतामपि तिक्ततामुपेक्ष्यैव गुडादिर्गृह्यते । एवं दृश्यं नामरूपकर्मात्मकमुपेक्ष्य तद् ब्रह्म सच्चिदानन्दरूपं गृह्यते आत्मविद्भिः । नामरूपकर्मबुद्धिरेव प्रतिबन्धिका आत्मविज्ञाने इति भावः । तथा च वेदान्तडिण्डिमः - 'त्रयं वा इदं नामरूपं कर्म' (बृ. १-६-१) इति, 'तदेतदमृत॰ सत्येन च्छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः' (बृ. १-६-३) "अथात आदेशो नेति नेति न ह्येतदस्मादिति नेत्यन्यत्परमस्त्यथ नामधेय॰ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" (बृ. २-३-६) इति च नामरूपकर्मोपाधिनिरसनेन ब्रह्मण एव परमार्थतया ग्राह्यत्वमुद्धोषयति ॥ ७६ ॥

---

1. यद्ब्रह्म - दे. आ.

**सुखमल्पं बहुक्लेशं[1] विषयग्राहिणां नृणाम् ।**
**अनन्तं ब्रह्मनिष्ठानामिति वेदान्तडिण्डिमः ॥ ७७ ॥**

**सुखम्** इति । विषयग्राहिणां विषयानेव गृह्णन्ति ताच्छील्येनेति विषय ग्राहिणः पराग्दर्शिनः प्रत्यगात्मविमुखा इति यावत् । तेषां विषयग्राहिणां सुखमल्पम् । तच्च बहुक्लेशं बहुलायाससाध्यम् । तद्धि विषयसुखमिति व्यवह्रियमाणं ब्रह्मानन्दस्वरूपमेव सत् शुभकर्मणा स्वेष्टविषयविशेषे सन्निधाप्यमाने अन्तः करणवृत्तिविशेषे च प्रसन्ने सत्यभिव्यज्यते । तादृशकर्मणश्च येनकेनचिदेव संचित सुकृतेन प्राप्यत्वाद्बहुक्लेशसाध्यं तत्सुखम् । तादृशवृत्तिविशेषस्य दीर्घकालमनवस्थानादल्पं चेत्युच्यते । ब्रह्मनिष्ठानां पुनरानन्दस्वरूपे ब्रह्मणि स्वात्मत्वेन गृहीते आत्मत्वेन निष्ठा येषां तादृशानां सुखमनन्तम्, निरावरण स्वप्रकाशरूपत्वादिति भावः । अत एव वेदान्तडिण्डिमः - 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ.४-३-३२), 'सोऽश्नुते सर्वान् कामान्सह' (तै.२-१), 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन'' (तै.२-९) इति च ॥ ७७ ॥

न केवलं बहुलायाससाध्यक्षणिकसुखदायका विषयाः, किं तर्हि दुःखदाश्चेत्याह-

**धनैर्वा धनदैः पुत्रैर्दारागारसहोदरैः ।**
**ध्रुवं प्राणहरैर्दुःखमिति वेदान्तडिण्डिमः ॥ ७८ ॥**

**धनैः** इति । धनैर्न सुखं किं तु दुःखमेव, 'धिगर्थान् क्लेशकारिणः' इत्युक्तेः । धनार्थं च येऽपेक्षिताः पुत्राः, पुत्रार्थं चापेक्षिता ये दारागारसहोदरा अन्ये च तैर्धनदै र्ध्रुवं दुःखमेव न तु सुखम् । यतः प्राणहरास्ते न सुखोत्पादकाः । यद्यपि धनैः पुत्रादिभिश्च धर्मावाप्तिः सुखावाप्तिश्च श्रूयते । तथापि तन्मयतया ये धनादिष्वेवासक्ताः तेषां प्राणा एव ह्रियन्ते धनादिभिः । तदर्थमेव सर्वस्यापि जीवितस्य क्षयादिति भावः । अत एव हि वेदान्तडिण्डिमः - ''मृत्युनाप्तꣳसर्वं

1. बहुः क्लेशो - दे. आ.

मृत्युनाभिपन्नम्'' (बृ. ३-१-३) ''पुनःपुनर्वशमापद्यते मे'' (क. १-२-६), ''ते मृत्योर्यन्ति विततस्य पाशम्'' (क. २-१-२) इत्यादिः ॥ ७८ ॥

यत एवं तस्मादुज्झित्वा विषयचिन्तनम् -

**सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम् ।**
**नातिदूरे नृणां मृत्युरिति वेदान्तडिण्डिमः ॥ ७९ ॥**

सुप्तेः इति । स्पष्टार्थः श्लोकः । सुप्तेरुत्थाय सुप्त्यन्तमिति सादरं नैरन्तर्येण चिन्तने क्षिप्रमेव ज्ञानमुदेष्यतीति ज्ञापनार्थम् । 'यमेवैष वृणुते तेन लभ्यः' (मुं. ३-२-३) इत्यादिश्रुतिडिण्डिमात् ॥ ७९ ॥

ब्रह्मविद्यातः सर्वानर्थनिवृत्तिर्नित्यस्वरूपानन्दप्राप्तिश्च भवतीति पुनरप्याचष्टे प्रकरणोपसंहारार्थम् -

**पञ्चानामपि कोशानां मायानर्थात्मतोचिता[1] ।**
**तत्साक्षिब्रह्मविज्ञानादिति[2] वेदान्तडिण्डिम ॥ ८०॥**

पञ्चानां इति । अन्नमयादीनां पञ्चानामपि कोशानां मायात्मता युक्तिहीनप्रकाशत्वात् स्वप्नप्रतिभासमानदेहादिवत् , व्यभिचरितस्वरूपत्वाच्च सुषुप्त्यादिषु । तेषामनर्थात्मता च कर्तृत्वभोक्तृत्वाध्यासप्रयोजकत्वात् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (क.१-३-४) इति श्रुतेः । तदेवं पञ्चानामपि कोशानां मायानर्थात्मतैवोचिता इति कदा विज्ञायते ? तत्राह - तत्साक्षिब्रह्मविज्ञानात् । तेषां पञ्चकोशानां साक्षी तद्विलक्षणः सच्चिदानन्दस्वरूपः । तस्य विज्ञानात् । नित्यशुद्धबुद्धमुक्तस्वभावोऽहमात्मेति विज्ञानात् शरीराद्यध्यासप्रयुक्तमनर्थव्रातं नैवानुभवतीति भावः । 'अथायमशरीरोऽमृतः' (बृ.४-४-७), 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.८-१२-१) इत्यादिश्रुतिडिण्डिमेभ्यः ॥ ८० ॥

---

1. 'मायानर्थव्ययोचिता' - आ. दे.
2. 'तत्साक्षी ब्रह्मविज्ञानम्' - आ. दे.

**दशमस्य[1] परिज्ञानान्नवज्ञस्य यथा सुखम् ।**
**तथा जीवस्य सत्प्राप्तिरिति[2] वेदान्तडिण्डिमः ॥८१॥**

दशमस्य इति । येयमनर्थनिवृत्तिः पूर्वश्लोकोदाहृता या च सुखप्राप्तिर्ब्रह्मविज्ञानात् सेयं नानिवृत्तस्य निवृत्तिः रोगादिनिवृत्तिवत् न वा अप्राप्तस्य प्राप्तिः ग्रामादिप्राप्तिवत्, नापीयं परोक्षा, किं तु पूर्वोक्त दशमाख्यायिकायां दशमस्य परिज्ञानात् यथा कल्पितदशमनाशप्रयुक्त-दुःखनाशस्तत्प्राप्तिसुखं चापरोक्षम् ; एवं कल्पितसंसारानर्थस्य जीवस्य नित्यानन्दस्वरूपत्वेन ज्ञानात् सत्प्राप्तिः । सत एव सुखस्य ज्ञानात्प्राप्ति-रित्यभिप्रायः ॥

इति वेदान्तडिण्डिमः - 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-१), 'अत्र ब्रह्म समश्नुते' (बृ. ४-४-७), 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विदः' (बृ. ३-९-२८) इत्यादिरेवमुद्धोषयति ॥८१॥

नित्यप्राप्तैव मुक्तिरित्येतद्विस्पष्टयति-

**नवभ्योऽस्ति परः[3] प्रत्यङ् नैव वेद[4] परं परम् ।**
**तद्विज्ञानाद्भवेत्तुल्या मुक्तिर्वेदान्तडिण्डिमः ॥ ८२ ॥**

नवभ्य इति । दशमदृष्टान्ते नवभ्यः पुरुषेभ्यः परो दशमोऽस्त्येव । परं तु तं परमन्यं नैव वेद नवज्ञो दशमोऽस्म्यहमिति । तथात्रापि विषयेभ्योऽनात्मभूतेभ्यः परः प्रत्यगात्मा अस्त्येव । तं तु प्रत्यगात्मानं विषयेभ्योऽन्यं नैव वेद जिज्ञासुः । तद्विज्ञानात् तस्य प्रत्यगात्मनो विज्ञानात् तुल्या मुक्तिः समानैव दुःखविमोचनम् । उभयत्रापि नित्यप्राप्तस्वरूपविज्ञानादेव दुःखनिवृत्तिरित्यर्थः । इति वेदान्त डिण्डिमः- 'आत्मानं चेद्विजानीयात्' (बृ. ४-४-१२), 'तरति शोकमात्मवित्' (छा. ७-१-३) इत्यादिः ॥ ८२ ॥

---

1. दशमत्वपरिज्ञाने - आ. दे. 2. 'संप्राप्तिः - दे. ; 'सत्प्राप्तौ' - आ.
3. परम् - आ. दे. 4. 'नव वेद' - दे ; 'न स वेद' - आ.

**नवाभासान्नव ज्ञात्वा नवोपाधीन्नवात्मना ।**
**मिथ्या ज्ञात्वावशिष्टे तु मौनं वेदान्तडिण्डिमः ॥८३॥**

नवाभासान् इति । उक्तदृष्टान्ते नवात्मना नव पुरुषान् ज्ञात्वा, आत्मनस्तदतिरिक्तत्वज्ञानसंपादने आप्तोक्तिमात्रं यथा पर्याप्तमासीत् । एवमत्रापि नवाभासान् उक्तनवबाह्यपुरुषस्थानीयान् नव विषयदेहेन्द्रियप्राणमनोबुद्ध्यहंकार चित्ताज्ञानरूपान् नवोपाधीन् नवात्मना ज्ञात्वा, तांश्च व्यभिचरितस्वरूपत्वात् मिथ्येति ज्ञात्वा, अवशिष्टे तु तत्त्वमसीत्यादि श्रुतिप्रोक्ते मौनं तदात्मनावस्थानमेव न यत्नान्तरकरणमस्ति तत्प्राप्तये, नित्यप्राप्तत्वादित्यभिप्रायः । तथा च वेदान्तडिण्डिमः - 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः' (बृ.३-५-१) इत्यादिः ॥ ८३ ॥

सर्वथा ब्रह्मात्मज्ञानी कृतकृत्य इत्येतत्प्रख्यापयन्नाह-

**परमे ब्रह्मणि स्वस्मिन् प्रविलाप्याखिलं जगत्**
**गायन्नद्वैतमात्मानमास्ते[1] वेदान्तडिण्डिमः ॥ ८४ ॥**

परमे इति । नित्यशुद्धात्मा परम् ब्रह्म । तदपेक्षया सर्वमपरम् । तस्मिन् परमे ब्रह्मणि स्वस्मिन् अखिलं जगत् प्रविलाप्य, अविद्यारोपितस्य तस्य स्वात्मनोऽतिरिक्ततया नास्तित्वमेवेति विद्यया प्रतिपद्येत्यर्थः । पृथिव्यादीनां तत्तत्कारणादन्यत्वात् परमकारणभूताद् ब्रह्मात्मनोऽनन्यत्वं सकलजगतः । 'वाचारम्भणं विकारो नामधेयम्' (छा. ६-१-४), 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छा. ६-८-७), 'इदं सर्वं यदयमात्मा' (बृ. २-४-६)-इत्यादिश्रुतिभ्यः । अथवा जागरितस्य प्रपञ्चस्य स्वप्नेऽभावात् स्वाप्नस्य च जागरितेऽभावात् उभयोश्च तत्त्वविचारदृष्ट्या विशेषाभावात् दृक्स्वरूपात्मनो व्यतिरेकेणादर्शनात्, सुषुप्ते च दृश्यमात्रस्य स्वात्मन्येव विलयात्, नास्य जगतः

1. अद्वैतमानन्दम् - आ.

स्वात्मव्यतिरेकेणाभाव इति बुद्ध्या अखिलं जगत् स्वस्मिन् प्रविलाप्य अद्वैतमात्मानं गायन्नास्ते सुखेन विहरति इति वेदान्तडिण्डिमः 'एतत् सामगायन्नास्ते। ..... अहमन्नमहमन्नमहमन्नम्'' (तै. ३-१०) इत्यादिः ॥

उक्तमेव विशदयति -

**प्रतिलोमानुलोमाभ्यां विश्वारोपापवादयोः ।**
**चिन्तने शिष्यते तत्त्वमिति वेदान्तडिण्डिमः ॥ ८५ ॥**

**प्रतिलोम०** इति। 'तस्माद्वा एतस्मात् आत्मन आकाशः संभूतः' (तै. २-१) इत्यादि श्रुत्युक्तक्रमेणानुलोमक्रमेणोत्पत्तिः तद्विपर्ययेण प्रतिलोमक्रमेण च लयः 'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥ खे वायुः प्रलयं याति मनस्याकाशमेव च। मनो हि परमं भूतं तदव्यक्ते प्रलीयते ॥ अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते। नास्ति तस्मात्परतरः पुरुषाद्वै सनातनात् ॥' (मो.ध. ३३८-२९, ३०, ३१) इत्यादि स्मृत्युक्तदिशा। अथवा 'एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्' (मां.६) इत्यादिश्रुतिदर्शितविधया आत्मन एव सर्वमुद्भूतं स्वप्नजागारितयोर्दृश्यते, तस्मिन्नेव तदात्मना प्रविलीनं भवति सुषुप्तौ - इत्यनुलोमतः प्रतिलोमतश्च विश्वारोपापवदयोश्चिन्तने। मिथ्यारूपस्य प्रतीतिक्रमचिन्ता आरोपः, तत्प्रतीतिबाधचिन्ता अपवादः। तथा रज्जौ भुजङ्गमप्रतीतिबाधयोश्चिन्तनेन रज्जुतत्त्वमेकमेवावशिष्यते, तद्वदिहापि विश्वारोपापवादयोश्चिन्तनेन एकमेवाद्वितीयं तत्त्वं शिष्यते इत्यभिप्रायः। 'अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति' (क.२-३-१३) इत्यादिश्रुतिडिण्डिमात् ॥ ८५ ॥

एतावदिहोक्तं प्रकरणे -

**नामरूपाभिमानः स्यात्संसारः सर्वदेहिनाम् ।**
**सच्चिदानन्ददृष्टिः स्यान्मुक्तिर्वेदान्तडिण्डिमः ॥ ८६ ॥**

**नामरूप०** इति । न संसारबन्धस्तस्मान्मोक्षणं वा आत्मनो वस्तुवृत्तेन, किंतु दृष्टिभेदेनैव । कथम् ? नामरूपयोरस्तित्वदृष्ट्या तदभिमानः संसारः । तादृशमिथ्यादृष्ट्यपगमेन सच्चिदानन्ददृष्ट्या च मुक्तिः । 'स्वेन रूपेणाभिनिष्पद्यते'' (छां. ८-१२-३) इति हि वेदान्तडिण्डिमः ॥ ८६ ॥

**सच्चिदानन्दसत्यत्वे मिथ्यात्वे नामरूपयोः ।**
**विज्ञाते किमिदं ज्ञेयमिति वेदान्तडिण्डिमः ॥ ८७ ॥**

**सच्चिदानन्द०** इति । सच्चिदानन्दरूपब्रह्मणोऽद्वितीयस्य सत्यत्वे विज्ञाते, नामरूपयोश्च मिथ्यात्वे विज्ञाते सति किमिदं ज्ञेयम्, नास्त्येव किमप्यपरं ज्ञेयम् । 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम्' (बृ.२-४-५), 'एतावद्ध्यनुशासनम्' (क. २-३-१५), 'नातः परमस्ति' (प्र.६-७) इत्यादिवेदान्तडिण्डिमेभ्यः ॥८७॥

तस्मात् -

**सालम्बनं निरालम्बं सर्वालम्बावलम्बितम् ।**
**अवलम्बेनाखिलालम्ब[1] इति वेदान्तडिण्डिमः ॥ ८८ ॥**

**सालम्बनम्** इति । आलम्ब्य जीवतीत्यालम्बनं जगत् । तेन सह वर्तत इति सालम्बनं ब्रह्मतत्त्वम् । ब्रह्माधारं विना जगद्भ्रान्तेरनुदयात् । स्वयं तु तद्ब्रह्म निरालम्बं नान्यदालम्ब्य स्थितम् । 'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नि' (छा. ७-२४-१) इति श्रुतेः । किं च सर्वालम्बावलम्बितम् । सर्वेषामाश्रयाणामिन्द्रादिदेवतानामप्याश्रयभूतम् इति भावः । 'यस्मिन् देवा अधि विश्वे निषेदुः' (श्वे. ४-८) इति श्रुतेः । तस्य ब्रह्मात्मनोऽवलम्बनेन तादात्म्याश्रयणेन अखिलालम्बः अखिलस्याप्याश्रयः कृतो भवति । अतो हित्वा भिन्नभिन्नदेवताश्रयं ब्रह्मैवाश्रीयतामित्यभिप्रायः । 'तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः'' (बृ. १-४-६) इत्यादिश्रुतिडिण्डिमात् ॥ ८८ ॥

---

1. आलम्बेनाखिलालम्बं - आ. दे.

**न कुर्यान्न विजानीयात् सर्वं ब्रह्मेत्यनुस्मरन् ।**
**यथा सुखं तथा तिष्ठेदिति वेदान्तडिण्डिमः ॥८९॥**

**न कुर्यात्** इति । सर्वं ब्रह्मेति विज्ञाय ज्ञानी किं कुर्यात् ? कथं तस्य व्यवहार इत्यत इदमुक्तम् - 'यथा सुखं तथा तिष्ठेत्' इति । न तस्य बाह्यव्यवहारे नियमः । सर्वदा त्वसौ परमात्मरतिरेव भवतीत्यभिप्रायः । अत एव 'कामान्नी कामरूप्यनुसंचरन्' (तै. ३-१०) इति, 'आत्मैवेदꣳ सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति' (छा. ७-२५-२) इति च श्रुतिडिण्डिमः ॥ ८९ ॥

ननु यदि सर्वथास्य कर्तव्याभावः, कथं तर्हि देहयात्रा ? तत्राह -

**स्वकर्मपाशवशगः प्राज्ञोऽन्यो वा जनो ध्रुवम् ।**
**प्राज्ञः[1] सुखं नयेत्कालमिति वेदान्तडिण्डिमः ॥९०॥**

**स्वकर्म** इति । अज्ञो जनः क्लिश्यति, प्राज्ञस्तु प्रारब्धकर्मवशेन प्राप्तमनुभवन् सुखेन कालं नयतीत्यभिप्रायः । एतदपि व्यवहारदृष्ट्या । परमार्थतस्तु ज्ञानी नैव करोति, न वा कर्मफलं भुङ्क्ते । उक्तं हि पूर्वमेव 'न पुण्यकर्मणो वृद्धिः' (२८) इत्यादि ॥

**न विद्वांसं[2] तपेच्चित्तं करणेऽकरणे[3] ध्रुवम् ।**
**सर्वमात्मेति[4] विज्ञानादिति वेदान्तडिण्डिमः ॥९१॥**

**न विद्वांसम्** इति । पापस्य करणे पापस्य अकरणे वा किमहं शोभनं कर्म न कृतवान्, किं वा पापं कृतवान् ? अहो का मम गतिर्भवित्री मरणादूर्ध्वमिति न विद्वान् तापयेच्चित्तम् । तत्कस्मात् ? सर्वं पापपुण्यतत्फलात्मकमात्मैवेति

1. यथा - क.
2. न विद्वान् सन्तपेच्चित्तं - आ. दे.
3. करणाकरणो - दे.
4. सर्वमात्मनि - क.

विज्ञानात् । ज्ञानात्पूर्वं कृतमकृतं वा न तस्य तापकं भवति, तदूर्ध्वं तु कर्तृत्वाभिमानरहित एवेति सुतरां न तापकमिति भावः । तथा च वेदान्तडिण्डिमः- 'एतꣳह वाव न तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मानꣳ स्पृणुते'' (तै. २-९) इति ॥ ९१ ॥

कथं पुनः कृतस्यापि कर्मणो लेपाभावः ? तत्राह -

**नैवाभासं स्पृशेत्कर्म मिथ्योपाधिमपि स्वयम् ।**
**कुतोऽधिष्ठानमत्यच्छमिति[1] वेदान्तडिण्डिमः ॥ ९२ ॥**

**नैवाभासम्** इति । कृतं हि कर्म नैवाभासं स्पृशेत् । आभासो नाम कर्तृत्वभोक्तृत्वेनाभासमानं चैतन्ये समारोपितं रूपम् । तमाभासं न कर्म स्पृशति, तस्य मिथ्यारूपत्वात् । तस्योपाधिमप्यन्तःकरणादिरूपं नैव स्पृशेत्, उक्तहेतोरेव । किमु वक्तव्यमधिष्ठानं यच्चैतन्यं यत्रोक्तमुभयमप्यध्यस्यते तन्नैव स्पृशेदिति अत्यच्छमतिनिर्मलं हि तत् । कूटस्थनिर्विकारमिति यावत् । तदेवं परमार्थदृष्ट्या कर्मकृतः संसारः कस्यचिदपि नास्त्येवेति भावः । 'नायं हन्ति न हन्यते' (क. १-२-१९) इत्यादिश्रुतेः ॥ ९२ ॥

**अहोऽस्माकमलं मोहैरात्मा ब्रह्मेति निर्भयम् ।**
**श्रुतिभेरीरवोऽद्यापि श्रूयते श्रुतिरञ्जनः ॥ ९३ ॥**

**अहो॰** इति । अस्माकं मोहैरलम् । कुतो नास्ति मोहकारणम् ? यत आत्मा निर्भयं निरवद्यमद्वितीयं ब्रह्मैवेति श्रुतिभेरीरवोऽद्यापि श्रूयते । संसारकालेऽपि श्रुतिशासनं श्रूयत एव । तथापि विषयव्यग्रचित्ता श्रुतिरञ्जनं तं ध्वनिमनादृत्य मुह्यन्ति । अहो ! इत्याश्चर्ये । 'को मोहः कः शोकः' (ई. ७) 'अयमात्मा ब्रह्म' (बृ. २-५-१९) इत्यादिश्रुतिभ्यः ॥ ९३ ॥

---

1. अत्यन्तम् - क.

**वेदान्तभेरीझङ्कारः प्रतिवादिभयंकरः ।**
**श्रूयतां ब्राह्मणैः श्रीमद्दक्षिणामूर्त्यनुग्रहात् ॥ ९४ ॥**

**वेदान्त॰** इति । वेदान्तभेरीझङ्कारः उपनिषद्रूपभेर्या निर्घोषः प्रतिवादिनां द्वैतिनां भयंकरः, तेषां सत्यत्वेनाभिमतस्यातिप्रियतमस्य प्रपञ्चस्य निःसंशयं मिथ्यात्वप्रतिपादनात् । मुमुक्षूणां तु पूर्वोक्तरीत्या श्रुतिरञ्जन एव, अविद्याकृत संसारस्वप्नभयात्प्रबोधनात् इति भावः । सोऽयं झङ्कारः श्रूयतां ब्राह्मणैः सर्वैरप्यधिकारिभिः इत्यर्थः । ब्राह्मणस्य मुख्याधिकारित्वादुपलक्षणार्थं तद्ग्रहणम् । कथं पुनः सर्वैः श्रूयतामयं झङ्कारः ? 'श्रवणायापि बहुभिर्यो न लभ्यः' (क.१-२-७) इति हि श्रुतिः, तत्राह - श्रीमद्दक्षिणामूर्त्यनुग्रहात् । परमेश्वरमेव शरणं गतानां तदनुग्रहादेव सच्छास्त्रश्रवणं सद्गुरुमुखात्, ततो मनननिदिध्यासनाभ्यां सर्वेष्टप्राप्तिरिति भावः । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' (श्वे. ६-२३) इत्यनुशासनादिति ॥ ९४ ॥

वेदान्तडिण्डिमस्येयं रचिता भावबोधिनी । सुब्रह्मण्येन सुधिया[1] जिज्ञासुजनशङ्करी ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहसरस्वतीतीर्थप्रणीतं
वेदान्तडिण्डिमप्रकरणं भावबोधिनीव्याख्यासंवलितं परिसमाप्तम्

---

1. सच्चिदानन्दसुधिया, इति नवीनपाठः ।

# अनुबन्धः - १

## श्लोकानां वर्णानुक्रमणिका

(अत्र प्रथमनिर्दिष्टा पृष्ठसंख्या, समनन्तरनिर्दिष्टा तु श्लोकसंख्या)


| | | |
|---|---|---|
| अद्वैतद्वैतवादौ.. | १२ | १९ |
| अनामरूपम्.. | ३९ | ६८ |
| अभेददर्शनम्.. | ४० | ७१ |
| अलं यागैः.. | १५ | २३ |
| अलं वेदैः .. | १५ | २४ |
| अवस्थात्रितयं यस्य.. | २२ | ३७ |
| अविज्ञाते जन्म.. | ४३ | ७४ |
| अविद्योपाधिको जीव.. | १९ | ३१ |
| असत्यः सर्वसंसारः.. | ९ | १३ |
| अहोऽस्माकम्.. | ५१ | ९३ |
| अहं साक्षीति.. | २९ | ४८ |
| आत्मानात्मपदार्थौ.. | २ | २ |
| उपेक्ष्यौपाधिकान्.. | ४३ | ७६ |
| ऐहिकं चामुष्मिकं च.. | १२ | १८ |
| कर्माणि चित्तशुध्यर्थम् | १६ | २६ |
| कर्मिणो विनिवर्तन्ते.. | १३ | २० |
| घटकुड्यादिकम्.. | २२ | ३६ |
| चिन्त्याचिन्त्यपदार्थौ.. | ६ | ९ |
| जीवो ब्रह्मात्मना.. | ११ | १६ |
| ज्ञातृज्ञेयपदार्थौ.. | ४ | ४ |
| ज्ञानकर्मपदार्थौ.. | ५ | ७ |
| ज्ञानाज्ञानपदार्थौ.. | ४ | ३ |
| दशमस्यापरिज्ञनात्.. | ४६ | ८१ |
| दशमस्य परिज्ञाने.. | ४२ | ७५ |
| दृग्दृश्यौ द्वौ.. | १९ | ३० |
| देहादिपञ्चकोशस्था.. | ३१ | ५१ |
| ” | ३२ | ५२ |
| ” | ३२ | ५३ |
| देहादिकोशगा.. | ३४ | ५७ |
| ” | ३४ | ५८ |
| ” | ३४ | ५९ |
| देहो नाहम्.. | २६ | ४३ |
| द्विजत्वं विध्यनुष्ठानात्.. | २० | ३३ |
| धनैर्वा.. | ४४ | ७८ |
| ध्येयाध्येयपदार्थौ.. | ७ | १० |
| न काम्यप्रतिषिद्धाभिः.. | ४१ | ७३ |
| न कुर्यात्.. | ५० | ८९ |
| न जीवब्रह्मणोर्भेदः.. | ३५ | ६१ |
| ” | ३५ | ६२ |
| ” | ३६ | ६३ |
| ” | ३६ | ६४ |
| ” | ३८ | ६६ |
| न नामरूपे नियते.. | ३७ | ६५ |
| न पुण्यकर्मणो वृद्धिः.. | १७ | २८ |

| | | |
|---|---|---|
| न मताभिनिवेशेन.. | ४१ | ७२ |
| नर्चा न यजुषा | १६ | २५ |
| नवभ्योऽस्ति | ४७ | ८२ |
| न वर्णाश्रमसङ्केतैः.. | ८ | १२ |
| नवाभासान्.. | ४७ | ८३ |
| न विद्वांसम्.. | ५० | ९१ |
| न सत्यः कथ्यते.. | ४० | ६९ |
| नाज्ञानं स्याम्.. | २८ | ४७ |
| नामरूपात्मकम्.. | ४० | ७० |
| नामरूपाभिमानः.. | ४८ | ८६ |
| नाहं माया.. | २९ | ४९ |
| नाहं सर्वम्.. | ३० | ५० |
| नैवाभासम्.. | ५१ | ९२ |
| पञ्चानामपि.. | ४५ | ८० |
| परमे ब्रह्मणि.. | ४७ | ८४ |
| परोक्षासतफलम्.. | १३ | २१ |
| पुरुषार्थत्रयाविष्टाः.. | २५ | ४० |
| प्रतिलोमानुलोमाभ्याम् | ४८ | ८५ |
| प्राणो नाहमहं देवः.. | २७ | ४४ |
| बुद्धिर्नाहमहं देवः.. | २७ | ४६ |
| बुद्धिपूर्वा.. | १८ | २९ |
| ब्रह्म सत्यम्.. | ३८ | ६७ |
| मनो नाहम्.. | २७ | ४५ |
| यदस्त्यादौ.. | २४ | ३९ |
| यन्नादौ यच्च.. | २३ | ३८ |
| योगिनो भोगिनो वापि | ७ | ११ |
| वृथा क्रियाः.. | १० | १४ |
| वृथा श्रमोऽयं.. | १४ | २२ |
| वेदान्तडिण्डिमाः | १ | १ |
| वेदान्तभेरिझङ्कारः.. | ५२ | ९४ |
| व्योमादिपञ्चभूतस्था.. | ३३ | ५४ |
| ,, | ३३ | ५५ |
| ,, | ३३ | ५६ |
| श्रोतव्याश्राव्यरूपौ.. | ६ | ८ |
| षण्निहत्य.. | २५ | ४१ |
| सत्तास्फुरणसौख्यानि.. | २१ | ३५ |
| सच्चिदानन्दरूपत्वात्.. | ३५ | ६० |
| सच्चिदानन्दसत्यत्वे.. | ४९ | ८७ |
| सञ्चितागामिकर्माणि.. | १७ | २७ |
| समष्टिव्यष्टिरूपौ द्वौ.. | ५ | ६ |
| सर्वात्मत्वात्.. | ११ | १७ |
| सर्वात्मना स्थितम्.. | २१ | ३४ |
| साकारं च निराकारम्.. | २० | ३२ |
| सालम्बनं निरालम्बम्.. | ४९ | ८८ |
| सुखदुःखपदार्थौ.. | ४ | ५ |
| सुखमल्पम्.. | ४४ | ७७ |
| सुप्तेरुत्थाय.. | ४५ | ७९ |
| स्थितो ब्रह्मात्मना.. | १० | १५ |
| स्वकर्मपाशवशगः.. | ५० | ९० |
| हित्वा षट्.. | २६ | ४२ |

# अनुबन्धः - २
# मुख्यविषयाणां वर्णानुक्रमणिका


| विषयाः | श्लोकसंख्या |
| --- | --- |
| अविद्या माया च | ३०, ३१, ४९, ८० |
| आत्मस्वरूपम् | २, १७, ६०, ७४, ९३ |
| ईश्वरः | ६, ३१, ७३ |
| कर्म, उपासना, ज्ञानं च | ७, १२, १८, २०-२२, २६-२९, ३३, ७३ |
| कूटस्थः | ५३ |
| कोशगानां भूतगानां च सत्तास्फूर्तिप्रियत्वानामैक्यम् | ५७-५९ |
| जीवः | ६, १५, १६, ३१ |
| जीवब्रह्मैक्यम् | १५-१७, ६०-६७ |
| पञ्चकोशस्थानि सत्तास्फूर्तिप्रियत्वान्यात्मन एव | ५१-५६ |
| पञ्चकोशानां मिथ्यात्वम् | ८० |
| पञ्चभूतस्थानि सत्तास्फूर्तिप्रियत्वन्यात्मन एव | ५४-५६ |
| प्रपञ्चविलयः | ८४-८५ |
| ब्रह्म | २, ३, ५, ८-१०, २३, २४, १८, ३०-३२ |
| ब्रह्मज्ञानस्य आवश्यकता महिमा च | ११-१४, २०-२५, ३३, ७४ |
| ब्रह्मज्ञानस्य सौलभ्यम् | ७५, ७६ |
| ब्रह्मज्ञानात् सुखम्, अन्यस्मात् दुःखम् | ७७-८०, ८८ |
| ब्रह्मज्ञानी कृतकृत्यः | ८७-९४ |
| ब्रह्मात्मज्ञाने दशमदृष्टान्तः | ७५, ८१-८३ |
| मोक्षसाधनम् | १९, ४१-४९, ७१-७३, ८६ |
| सर्वं सच्चिदानन्दरूपं ब्रह्मैव | ३४-३६, ३८ |


-------

# अनुबन्धः - ३

## व्याख्याने उदाहृतानि श्रुतिस्मृतिवाक्यानि

व्याख्याने उद्धृतानाम् प्रमाणवाक्यानाम् मूलग्रन्थानुक्रमः
अत्र कंसे दत्ताः अङ्काः स्वमूलग्रन्थमन्त्र सङ्ख्या सूचकाः
अनन्तरं दत्ता तु एतद्ग्रन्थे मन्त्र सङ्ख्यासूचकाः


| | | मूलम् | श्लोकसंख्या |
|---|---|---|---|
| अ. | ईशावास्योपनिषद् (माध्यन्दिनशाखा) | | |
| १. | असूर्या नाम ते लोकाः | (३) | ३ |
| २. | अविद्यया मृत्युं तीर्त्वा | (१४) | २६ |
| ३. | तत्र को मोहः कः शोकः | (७) | १९, ४५, ९३ |
| ४. | यस्तु सर्वाणि भूतानि | (६) | ५० |
| आ. | केनोपनिषत् | | |
| १. | इह चेदवेदीदथ सत्यमस्ति | (२-५) | २१, ७४ |
| २. | तदेव ब्रह्म त्वं विद्धि नेदं | (१-५) | ७ |
| ३. | श्रोत्रस्य श्रोत्रम् मनसो मनो | (१-२) | ४ |
| इ. | काठकोपनिषत् | | |
| १. | अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म | (२-३-१४) | २१ |
| २. | अन्यत्र धर्मादन्यत्र | (१-२-१४) | ७ |
| ३. | अशब्दमस्पर्शमरूपम् | (१-३-१५) | ६५ |
| ४. | अशरीरँ शरीरेषु | (१-२-२२) | ४३, ६७ |
| ५. | अस्तीत्येवोपलब्धस्य | (२-३-१३) | ८५ |
| ६. | आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुः | (१-३-४) | ४६, ८० |
| ७. | एतावद्ध्यनुशासनम् | (२-३-१५) | ८७ |
| ८. | तस्येन्द्रियाण्यवश्यानि | (१-३-५) | ९ |
| ९. | ते मृत्योर्यन्ति विततस्य पाशम् | (२-१-२) | ७८ |
| १०. | तं स्वाच्छरीरात्प्रवृहेत् | (२-३-१७) | ४८ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ११. | न जायते म्रियते वा विपश्चित् | (१-२-१८) | ४३ |
| १२. | न प्राणेन नापानेन मर्त्यो जीवति | (२-२-५) | ४४ |
| १३. | न संदृशे तिष्ठति रूपमस्य | (२-३-९) | ६५ |
| १४. | नायं हन्ति न हन्यते | (१-२-१९) | ९२ |
| १५. | नाविरतो दुश्चरितात् | (१-२-२४) | ७३ |
| १६. | नेह नानास्ति किञ्चन | (२-१-११) | ६७ |
| १७. | पराचः कामाननुयन्ति बालाः | (२-१-२) | ९ |
| १८. | पुनः पुनः वशमापद्यते मे | (१-२-६) | ७८ |
| १९. | यथाकर्म यथाश्रुतम् | (२-२-७) | २० |
| २०. | यदा सर्वे प्रमुच्यन्ते कामा येऽस्य | (२-३-१४) | ४२ |
| २१. | सर्वे वेदाः यत्पदमामनन्ति | (१-२-१५) | २४ |
| २२. | श्रवणायापि बहुभिर्यो न लभ्यः | (१-२-७) | ९४ |

मुण्डकोपनिषत्

| | | | |
|---|---|---|---|
| १. | अनीशया शोचति मुह्यमानः | (३-१-२) | ३ |
| २. | अविद्यायामन्तरे वर्तमानाः | (१-२-८) | ३ |
| ३. | जरामृत्युं ते पुनरेवापि यान्ति | (१-२-७) | २० |
| ४. | तथा विद्वान् नामरूपाद्विमुक्तः | (३-२-८) | ६५ |
| ५. | तदिहान्तिके च पश्यस्त्विहैव | (३-१-७) | ७४ |
| ६. | तमेव भान्तमनुभाति सर्वम् | (२-२-१०) | ५२, ४ |
| ७. | तमेवैकं जानथ आत्मानमन्या वाचो | (२-२-५) | १०, १४ |
| ८. | नायमात्मा प्रवचनेन लभ्यः | (३-२-३) | १२, ७२ |
| ९. | नास्त्यकृतः कृतेन | (१-२-१२) | ७ |
| १०. | पर्याप्तकामस्य कृतात्मनस्तु | (३-२-२) | २३ |
| ११. | प्रणवो धनुः | (२-२-४) | ४२ |
| १२. | ब्रह्म वेद ब्रह्मैव भवति | (३-२-९) | १६ |
| १३. | ब्रह्मैवेदं विश्वम् | (२-२-११) | ३६ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| १४. | ब्राह्मणो निर्वेदमायात् | (१-२-१२) | ४२ |
| १५. | यत्कर्मिणो न प्रवेदयन्ति रागात्तेनाऽऽतुराः | (१-२-९) | २२ |
| १६. | यमेवैष वृणुते तेन लभ्यः | (३-२-३) | ७९ |
| १७. | स कामभिर्जायते तत्र तत्र | (३-२-२) | ७३ |
| १८. | क्षीयन्ते चास्य कर्माणि | (२-२-८) | २७ |

### प्रश्नोपनिषत्

| | | | |
|---|---|---|---|
| १. | एतस्मान्न पुनरावर्तन्ते | (१-१०) | २० |
| २. | एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः | (६-५) | ६४ |
| ३. | एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता | (४-९) | ३१ |
| ४. | त एव पुनरावर्तन्ते | (१-९) | २० |
| ५. | नातः परमस्ति | (६-७) | ८७ |
| ६. | स यो ह वै तदच्छायम् | (४-१०) | ६४ |

### माण्डूक्योपनिषत्

| | | | |
|---|---|---|---|
| १. | अयमात्मा ब्रह्म | २ | ५४, ६० |
| २. | एष योनिः सर्वस्य प्रभवाप्ययौ हि | ६ | ८५ |
| ३. | जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गः | ३ | ५५, ६६ |

### तैत्तिरीयोपनिषत्

| | | | |
|---|---|---|---|
| १. | अथ सोऽभयं गतो भवति | (२-७) | ६७ |
| २. | अन्योऽन्तर आत्मानन्दमयः | (२-५) | २ |
| ३. | अन्योऽन्तर आत्मा प्राणमयः | (२-२) | २ |
| ४. | अन्योऽन्तर आत्मा मनोमयः | (२-३) | २ |
| ५. | अन्योऽन्तर आत्मा विज्ञानमयः | (२-४) | २ |
| ६. | आनन्दाद्ध्येव खल्विमानि | (३-६) | ३५ |
| ७. | आनन्दं ब्रह्मणो विद्वान् न बिभेति | (२-९) | ७७ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ८. | इदꣳ सर्वमसृजत | (२-६) | ३४ |
| ९. | उभे ह्येवैष एते आत्मानँ स्पृणुते | (२-९) | २९ |
| १०. | एतꣳ ह वाव न तपति | (२-९) | ९१ |
| ११. | एतत् साम गायन्नास्ते....अहमन्नम् | (३-१०-६) | ८४ |
| १२. | एतमन्नमयमात्मानम् उपसङ्क्रम्य | (३-१०-५) | ४२ |
| १३. | एतमानन्दमयमात्मानम् उपसङ्क्रामति | (२-८) | ४१ |
| १४. | कामान्नी कामरूप्यनुसंचरन् | (३-१०-५) | ८९ |
| १५. | को ह्येवान्यात्कः प्राण्यात् | (२-७) | १३ |
| १६. | तस्माद्वा एतस्मादात्मन आकाशः | (२-१) | ५५ |
| १७. | ब्रह्मविदाप्नोति परम् | (२-१) | ११ |
| १८. | यश्चायं पुरुषे । यश्चासावादित्ये । स एकः | (२-८-५) | ६४ |
| १९. | यतो वाचो निवर्तन्ते | (२-९) | ७० |
| २०. | रसो वै सः | (२-७) | ५३ |
| २१. | सच्च त्यच्चाभवत् .... यदिदं किंच | (२-६) | ३५, ६८ |
| २२. | सत्यम् ज्ञानमनन्तम् ब्रह्म | (२-१) | ३५, ३९, ६० |
| २३. | सत्यं चानृतं च सत्यमभवत् | (२-६) | ५९ |
| २४. | सोऽश्नुते सर्वान् कामान्सह | (२-१) | ७७ |


## छान्दोग्योपनिषत्


| | | | |
|---|---|---|---|
| १. | अनेन जीवेनात्मना अनुप्रविश्य | (६-३-२) | १५ |
| २. | अशरीरं वाव सन्तं न प्रियाप्रिये | (८-१२-१) | ८० |
| ३. | आत्मैवेदꣳ सर्वमिति स वा एष एवं | (७-२५-२) | ८९ |
| ४. | एवमेवामुत्र पुण्यजितो लोकः क्षीयते | (८-१-६) | १८, २१ |
| ५. | तत्सत्यम् स आत्मा तत्त्वमसि | (६-८-७) | ३९,५६,६०,६७,८४ |
| ६. | तत्सत्यम् स आत्मा तत्त्वमसि | (६-१५-३) | १५, ७५ |
| ७. | तद्यथा इषीकातूलमग्नौ प्रोतं | (५-२४-३) | २७ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ८. | तद्धास्य विजज्ञौ | (६-१६-३) | ७५ |
| ९ | तरति शोकमात्मवित् | (७-१-३) | ३, ८२ |
| १०. | तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ | (६-१४-२) | २७ |
| ११. | यथा पुष्करपलाश आपो न श्लिष्यन्ते | (४-१४-३) | २७ |
| १२. | यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं | (६-१-४) | ३६ |
| १३. | यत्रैत्पुरुषः स्वपिति नाम सता सोम्य तदा | (६-८-१) | ६५ |
| १४. | वाचारम्भणं विकारो नामधेयम् | (६-१-४) | ६९, ८४ |
| १५. | सन्मूलाः सोम्येमाः सर्वाः प्रजाः | (६-८-४) | ५१ |
| १६. | स भगवः कस्मिन् प्रतिष्ठित | (७-२४-१) | ८८ |
| १७. | सर्वकर्मा सर्वकामः सर्वगन्धः सर्व रसः | (३-१४-२) | ३२ |
| १८. | सर्वं तदभिसमेति यत्किंश्च प्रजाः | (४-१-४) | २५ |
| १९. | सर्वं खल्विदं ब्रह्म, तज्जलान् | (३-१४-१) | ३४, ६८ |
| २०. | सोऽन्वेष्टव्यः स विजिज्ञासितव्यः | (८-७-१) | २१ |
| २१. | स्वेन रूपेणाभिनिष्पद्यते | (८-१२-३) | ८६ |
| २२. | हिरण्यश्मश्रुर्हिरण्यकेशा आप्रणखात् | (१-६-६) | ३२ |

**बृहदारण्यकोपनिषत्　(काण्वशाखापाठः)**

| | | | |
|---|---|---|---|
| १. | अथ ब्राह्मणः | (३-५-१) | ३३ |
| २. | अथ य एतदक्षरं | (३-८-१०) | ४० |
| ३. | अथात आदेशो नेति नेति | (२-३-६) | ३१, ७६ |
| ४. | अथायमशरीरोऽमृतः | (४-४-७) | ८० |
| ५. | अन्योऽसावन्योऽहमस्मीति न स वेद | (१-४-१०) | ४२ |
| ६. | अन्यत्र मनाः अभूवं नादर्शमन्यत्रमना | (१-५-३) | ४५ |
| ७. | अमृतस्य नाशास्ति वित्तेन इति | (२-४-२) | ७ |
| ८. | अयमात्मा ब्रह्म | (२-५-१९) | १७,४९,९३ |
| ९. | असङ्गो ह्ययम् पुरुषः | (४-३-१६) | २८ |
| १०. | अस्थूलमनणु | (३-८-८) | ३१, ३२ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ११. | अहं ब्रह्मास्मि | (१-४-१०) | १५, ६० |
| १२. | अत्र ब्रह्म समश्नुते | (४-४-७) | ८१ |
| १३. | आत्मा वा अरे द्रष्टव्यः श्रोतव्यो | (२-४-५) | १०, ४२ |
| १४. | आत्मानं चेद् विजानीयात् अयमस्मीति | (४-४-१२) | २३, ८२ |
| १५. | आत्मनस्तु कामाय सर्वं प्रियं भवति | (२-४-५) | ५३ |
| १६. | आत्मैवास्य ज्योतिर्भवतीति | (४-३-६) | ३९, ५२ |
| १७. | आत्मनो वा अरे दर्शनेन श्रवणेन | (२-४-५) | ८७ |
| १८. | इदं सर्वं यदमयमात्मा | (२-४-६) | ३६, ८४ |
| १९. | इन्द्रो मायाभिः पुरुरूप ईयते | (२-५-१९) | १५ |
| २०. | उभे उ हेवैष एते तरति | (४-४-२२) | २७, २९ |
| २१. | एतस्यैव आनन्दस्य अन्यानि भूतानि | (४-३-३२) | १३, ७७ |
| २२. | एष त आत्मा | (३-७-२३) | २ |
| २३. | कर्मणा पितृलोकः | (१-५-१६) | २६ |
| २४. | तदेतत् अमृतꣳ सत्येन च्छन्नं प्राणो वा अमृतं | (१-६-३) | ७६ |
| २५. | एषोऽस्य परमानन्दः | (४-३-३२) | ५३ |
| २६. | कामः सङ्कल्पो विचिकित्सा | (१-५-३) | ४५ |
| २७. | तदेतत् प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयो | (१-४-८) | ५ |
| २८. | तद्यथा अहिनिर्ल्वयनी वल्मीके मृता | (४-४-७) | ६७ |
| २९. | तद्यथा रथनाभौ च रथनेमौ चाराः | (२-५-१५) | ६ |
| ३०. | तद्यदिदमाहुरमुं यजामुं | (१-४-६) | ८८ |
| ३१. | तमेतं वेदानुवचनेन ब्राह्मणाः | (४-४-२२) | २२ |
| ३२. | तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत | (४-४-२१) | १०, २१ |
| ३३. | तेषां न पुनरावृत्तिः | (६-२-१५) | २० |
| ३४. | तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य | (३-५-१) | ८३ |
| ३५. | न तत्रानन्दा मुदः प्रमुदो | (४-३-१०) | ५३ |
| ३६. | न तत्र रथा न रथयोगाः | (४-३-१०) | ३८ |
| ३७. | न तु तद् द्वितीयमस्ति | (४-३-२३) | ३८ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ३८. | न साधुना कर्मणा भूयान् नो | (४-४-२२) | २८ |
| ३९. | न हि द्रष्टुः दृष्टेर्विपरिलोपो विध्यते | (४-३-२३) | ३९ |
| ४०. | नान्योऽतोऽस्ति द्रष्टा | (३-७-२३) | ३० |
| ४१. | नान्योऽतोऽस्ति विज्ञाता | (३-७-२३) | ४ |
| ४२. | नेह नानास्ति किञ्चन | (४-४-१९) | ३८ |
| ४३. | प्रियꣳ रोत्स्यतीति | (१-४-८) | ५ |
| ४४. | पुत्रैषणायाश्च वित्तैषणायाश्च | (३-५-१) | ४१ |
| ४५. | मृत्युनाप्तꣳ सर्वं मृत्युनाभिपन्नम् | (३-१-३) | ७८ |
| ४६. | मृत्योः स मृत्युमाप्नोति य इह | (४-४-१९) | ७१ |
| ४७. | यथा ह वै बहवः पशवो मनुष्यम् | (१-४-१०) | ४० |
| ४८. | यद्वै तन्न पश्यति पश्यन्वै तन्न | (४-३-२३) | ४७ |
| ४९. | यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः | (२-५-१) | ५६ |
| ५०. | यत्साक्षादपरोक्षात् ब्रह्म | (३-४-१) | २१, ८१ |
| ५१. | यत्र हि द्वैतमिव भवति तदितर | (४-५-१५) | ३८ |
| ५२. | ये तद्विदुः अमृतास्ते भवन्त्यथेतरे | (४-४-१४) | ७४ |
| ५३. | यो अशनायपिपासे शोकं मोहं | (३-५-१) | ४ |
| ५४. | यो वा एतदक्षरं गार्गि अविदित्वा | (३-८-१०) | २२, ४० |
| ५५. | रूपꣳ रूपं प्रतिरूपो बभूव तदस्य | (२-५-१९) | ६ |
| ५६. | विज्ञानमानन्दं ब्रह्म | (३-९-२८-७) | ६०, ८१ |
| ५७. | वेदा अवेदाः | (४-३-२२) | २४ |
| ५८. | शान्तो दान्त उपरतस्तितिक्षुः समाहितः | (४-४-२३) | ४२ |
| ५९. | स समानः सन् उभौ लोकावनुसंचरति | (४-३-७) | ४६ |
| ६०. | सर्वं तं परादाद्योऽन्यत्रात्मनः | (२-४-६) | ५० |
| ६१. | सर्वेषाꣳ संकल्पानां मन एकायनम् | (२-४-११) | ४५ |
| ६२. | त्रयं वा इदं नाम रूपं कर्म | (१-६-१) | ७६ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| | **श्वेताश्वतरोपनिषत्** | | |
| १. | अथेतरे दुःखमेवापि यन्ति | (३-१०) | ५ |
| २. | ज्ञात्वा देवं मुच्यते सर्वपाशैः | (६-१३) | ३ |
| ३. | तऽह देवं आत्मबुद्धिप्रकाशम् | (६-१८) | ७३ |
| ४. | तमात्मस्थं येऽनुपश्यन्ति धीराः तेषाम् | (६-१२) | १३, १८ |
| ५. | तमेव विदित्वा अतिमृत्युमेति | (६-१५) | ३, १२ |
| ६. | नवद्वारे पुरे देही | (३-१८) | ६६ |
| ७. | नित्यो नित्यानाम् | (६-१३) | २८ |
| ८. | निष्कलं निष्क्रियं शान्तम् | (६-१९) | २८ |
| ९. | मायां तु प्रकृतिं विद्यात् | (४-१०) | ३०, ३१ |
| १०. | य एको जालवानीशत ईशनीभिः | (३-१) | ७० |
| ११. | य एतद्विदुः अमृतास्ते | (३-१०) | ७१ |
| १२. | यदात्मत्त्वेन तु ब्रह्मतत्त्वं | (२-१५) | २६ |
| १३. | यदा चर्मवदाकाशं वेष्टयिष्यन्ति | (६-२०) | १३, ७२ |
| १४. | यस्तन्न वेद किमृचा करिष्यति | (४-८) | २५, ८८ |
| १५. | यस्य देवे परा भक्तिः यथा देवे | (६-२३) | ९४ |
| १६. | क्षरं प्रधानममृताक्षरं हरः क्षरात्मानाविशते | (१-१०) | ४९ |
| | **कैवल्योपनिषत्** | | |
| १. | पुनश्च जन्मान्तरकर्मयोगात् | (१-१४) | ३७ |
| २. | स एव मायापरिमोहितात्मा | (१-१२) | ३७ |
| ३. | स्वप्ने तु जीवः सुखदुःख भोक्ता | (१-१३) | ३७ |
| | **नारायणोपनिषत्** | | |
| १. | कामः करोति नाहं करोमि | (७९) | ४१ |
| २. | धर्मेण पापमपनुदति | (७९) | २६ |
| ३ | न कर्मणा न प्रजया धनेन | (२८) | १२ |

| | | मूलम् | श्लोकसं |
|---|---|---|---|
| ४. | न सन्दृशे तिष्ठति रूपमस्य | (२) | ७० |
| ५. | यतः प्रसूता जगतः प्रसूती | (१) | ३४ |
| | **तैत्तिरीयारण्यकम्** | | |
| १. | तमेवं विद्वान् अमृत इह भवति | (३-३९) | ७ |
| २. | सर्वे वेदा यत्रैकं भवन्ति | (३-११) | २५ |
| ३. | सर्वाणि रूपाणि विचित्य | (३-१२-७) | ६५ |
| **II.** | **स्मृति वाक्यानि** | | |
| | **मोक्षधर्मः** | | |
| १. | अव्यक्तं पुरुषे ब्रह्मन् | (३३८-३१) | ८५ |
| २. | खे वायुः प्रलयं याति | (३३८-३०) | ८५ |
| ३. | जगत्प्रतिष्ठा देवर्षे | (३३८-२९) | ८५ |
| ४. | तमः श्वभ्रनिभं दृष्ट्वा | (३०१-६०) | ७० |
| | **श्री मद्भगवद्गीता** | | |
| १. | आ ब्रह्म भुवनाल्लोकाः | (८-१६) | २० |
| | **विष्णुपुराणं** | | |
| १. | परमार्थस्त्वमेवैको नान्योऽस्ति | (१-४-३८) | ७० |

---------

## अध्यात्मप्रकाशकार्यालये प्रकाशिताः
## संस्कृतग्रन्थाः

अध्यात्मप्रकाशकार्यालयप्रकाशितेषु उपनिषद्भाष्येषु विशेषोऽयं यत् (१) 'विषयानुसारेण प्रविभक्तग्रन्थशरीरत्वम्' (२) तत्तद्विभागप्रतिपाद्यविषयसूचक शिरोलेखनिवेशः, (३) पाठान्तरनिर्देशः भाष्यान्तरसंवादादिस्थलसूचनापूर्वकं मितमिताधष्टिप्पणदानम्, (४) विचारप्रचोदिका पीठिका, (५) उपनिषन्मूलस्य स्थूलाक्षरैः भाष्यस्य मध्यगात्राक्षरैः, उपनिषत्सारादि परिशिष्टभागस्य च सामान्य सूक्ष्माक्षरैः - इति चैवं विविधगात्रस्फुटाक्षरैरङ्कनं च इति । सुन्दरैरक्षरैः शुक्लमसृणपत्रे मुद्रापितानामप्येषां पुस्तकानां गात्राकारानुगुण्येन परिमितमूल्येनैव वितरणे प्रयत्नः कृतः । सर्वत्र टिप्पणव्याख्यानादिकं च नूत्नतया श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः अनुगृहीतम् ॥

१. **ईशावास्योपनिषत् (२००१) :** १२+ ५६ = ६८ पु.

सभाष्यटिप्पणयुता । उपनिषदो माध्यन्दिनपाठः जिज्ञासूपयोगिमन्त्रानुक्रमणिका शब्दसूच्यादिसमेता विचारप्रचोदकपीठिकायुता च ॥

२. **केनोपनिषत् (१९५९) :** २० + १११ = १३१ पु.

ईशावास्यभाष्यवदेव सर्वपरिकरोपेता । परिशिष्टे सार्थभाष्यस्थ मुख्यशब्दवर्णानुक्रमेण दत्ताः । अत्र भाष्यहृदयविसंवादिटीकाभिप्रायाः समालोचिताः । पदवाक्यभाष्ययोरेककर्तृकत्वमसंभावितमिति सविमर्शं पीठिकायामुपपादितं च ॥

३. **काठकोपनिषद्भाष्यम् (१९६२) :** १५इ + १९एस् + १५५ = १८९ पु.

केनभाष्यवत् सर्वपरिकरोपेतम् ।

४. **मुण्डकोपनिषद्भाष्यम् (१९६२) :** १८एस् + १३४ = १५२ पु.

कठभाष्यवत् सर्वपरिकरोपेतम् । पीठिकायां न केवलं भाष्यविषयविवेचनम्, किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतमत्र ॥

५. **माण्डूक्यरहस्यविवृतिः (१९५७) :** ७०इ + ५८ एस् + ४९० = ६१८ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीतायाम् अन्वर्थाभिधानायामस्यां व्याख्यायां माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण

तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । श्रीशङ्करभगवत्पादभाष्य वाक्यार्थश्च प्रतिपदं प्रस्थानत्रयभाष्यान्तरवाक्यान्तरसंगानेन मतान्तरदोषाविष्करण पूर्वकं तथा व्याकृतो यथा विशुद्धसंप्रदायाध्वना गतिर्निर्विघ्नं भवेत् पाठकानाम्। विशिष्य च अलातशान्तिप्रकरणे प्राचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तरसंक्रान्तिशङ्का निरसनपूर्वकं श्रीगौडपादसंमता वेदान्तप्रक्रिया प्रदर्शिता, पूर्वतनप्रकरणत्रयप्रक्रियया एकवाक्यतां गमिता च । आङ्ग्लभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादसंमतप्रक्रियया असाधारणं स्वरूपं माहायानिकप्रक्रियावैलक्षण्यस्फुटीकरण-पूर्वकं हृदयङ्गमं कृतम् ॥

## ६. ऐतरेयोपनिषत् :

इयं षडध्यायात्मिका शङ्करभाष्यसंयुता स्वामिपादानां टिप्पण्यादिभिरलङ्कृता। आद्यानां त्रयाणामध्यायानां प्राणोपासनवतां शङ्करभाष्येण सह ऐदंप्राथम्येन प्रकाशनम् (सर्वपरिकरोपेतं च)।

## ६. तैत्तिरीयोपनिषच्छीक्षावल्लीभाष्यम् (१९६१) : २० + ७६ = ९६ पु.

टिप्पण्यादि सर्वपरिकरोपेतं मुण्डकभाष्यवत् ॥

## ७. तैत्तिरीयोपनिषत् : आनन्दवल्ली भृगुवल्ली च (१९६२) :

४० + ४०७ = ४४७ पु.

सभाष्या - श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मित 'भाष्यार्थविमर्शिनी' व्याख्यासहिता । व्याख्यायां भाष्याक्षरानुक्रमेणैव विषयोपपादनं कृतम् । भाष्ये अर्वाचीनमतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं विशुद्धशाङ्कर-प्रक्रियायाः श्रैष्ठ्यं च सम्यगाविष्कृतम्।

पुस्तकस्यान्ते अनुवाकसूची, उपनिषत्खण्डसूची, अर्थनिर्देशपूर्वकं भाष्यस्थमुख्यशब्दानां सूची, विमर्शिनीगतमुख्यविषयसूची च - इत्येताः वर्णानुक्रमसूच्यो निवेशिताः। आंग्लगैर्वाणभूमिकयोः भाष्यगता मुख्यविषयाः सप्रपञ्चं परिशीलिताः - इति सर्वाङ्गसुन्दरं परिष्करणमिदम् ॥

## ८. सुगमा (१९५५-I, १९९९ - II) : १६ + ११९ = १३५ पु.

अध्यासभाष्यव्याख्या । श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता ।

प्रचलितव्याख्यानानां भिन्नभिन्नप्रस्थानावलम्बनत्वात् शुद्धं शाङ्करदर्शनं कीदृशम्, कथं च तदविवादम्, अविरुद्धं च स्यादिति संशयानानां मनःसमाधानाय प्रस्थानत्रयभाष्यैककण्ठ्यम् आदर्शयन्ती सार्वत्रिकानुभवानुसारिवेदान्तप्रक्रियाप्रख्यापनी इयं व्याख्या ॥

**९. सूत्रभाष्यार्थतत्त्वविवेचनी (१९६४) :** ८इ + ८एस् + १२२ = १३८ पु.

जिज्ञासाधिकरणा । भाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्र सरस्वतीसंयमिभिः प्रणीता। सार्वत्रिकानुभवानुसारि शाङ्करं प्रस्थानं स्वासाधारणधर्मविशिष्टं व्याख्यानगतप्रस्थानान्तर कलङ्करहितं दूरीकृतभाष्यान्तरदुराक्रमं च परिशुद्धरूपेणाविष्कृतमत्र ॥

**१०. सूत्रभाष्यार्थतत्त्वविवेचनी (१९६९) :** ८इ + १०एस् + १४६ = १६४ पु.

जन्माद्यधिकरणभाष्यव्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीविरचिता । यथैव जिज्ञासाधिकरणव्याख्यायां ब्रह्मज्ञानसतत्त्वनिर्धारणं कृतम्, एवमेवात्र जगज्जन्मादिकारणसतत्त्वनिर्धारणं कृतम् । सर्ववेदान्तादृताम् अध्यारोपापवाद-प्रक्रियामनुसृत्य । परिशिष्टे च जिज्ञासाधिकरणभाष्यव्याख्यायामिव सूत्रार्थसंबद्धाः केचन विषयाः भगवत्पादसंमतां वेदान्तप्रक्रियां निर्दिधारयिषूणाम् उपकाराय विचारिताः॥

**११. सूत्रभाष्यार्थतत्त्वविवेचनी (तृतीयो भागः) (१९७०) :**

८इ + १एस् + ३१२ = ३३९ पु.

शास्त्रयोनित्वाधिकरण - समन्वयाधिकरणभाष्ययोर्व्याख्या । पूर्ववदेव शुद्धशाङ्करप्रक्रियाप्रकाशिनी । परिशिष्टचिन्तायां शास्त्रप्रामाण्यसतत्वविमर्शः श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता- इत्याद्याः विषयाः संकलिताः ।

**१२. शुद्धशाङ्करप्रक्रियाभास्करः (१-२) (१९६४) :** ४ + ३८ = ४२ पु.

वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च - इति किरणद्वयात्मकः प्रथमो भागः ।

**१३. शुद्धशाङ्करप्रक्रियाभास्करः (३-४-५) (१९६४) :** ४ + ४८ = ५२ पु.

अस्मिन् द्वितीये भागे शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्तप्रक्रियास्वरूपम्, अध्यारोपापवादविशेषश्च - इत्येते विषयाः प्रतिपादिताः ।

**१४. शुद्धशाङ्करप्रक्रियाभास्करः (६-७) (१९६५) :** ४ + ५० = ५४ पु.

अस्मिन् तृतीये भागे - शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यं स्फुटितम्, शाङ्कराद्वैतस्य बौद्धमतसाम्यशङ्का च परिहृता।

**१५. गीताशास्त्रार्थविवेक : (१९६६) :** १०इ + १० एस् +१९६ = २१६ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतोऽयं ग्रन्थः। अल्पकायेनाप्यनेन-प्रकरणेन सुचिन्तितेन, श्रीशङ्करभगवत्पादभाष्यादृत एव वेदान्तार्थो गीताचार्यानुगृहीत इति, स एव चानुसृतः परमपुरुषार्थदायी इति च जिज्ञासवो निःसंशयं विजानीयुः। अत्र प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यान-ज्ञानयोगानां परस्परसंबन्धो निरूपितः। परिशिष्टे च भागे साङ्ख्ययोगदर्शनाभ्यां गीतादर्शनस्य सालक्षण्यवैलक्षण्ये विवेचिते येन स्पष्टं विज्ञायेत सर्ववेदान्तसिद्धान्त एव परिशुद्धः स्वीकृतोऽत्र शास्त्रे इति ॥

**१६. ब्रह्मविद्यारहस्यविवृतिः (१९६९) :** ८इ + १० एस् +१३२ = १५० पु.

सगुणनिर्गुणब्रह्मविद्याविवेकेन जिज्ञासूनां निरायासप्रवेशः ब्रह्मणि यथा लभ्येत तथा श्रीचरणैः छान्दोग्योपनिषदोऽष्टमोऽध्यायः अत्र व्याख्यातः।

**१७. नैष्कर्म्यसिद्धि : ('क्लेशापहारिणी' व्याख्या सहिता) (१९६८) :**

★★★ २३इ + ३१एस् +४६१ = ५१५ पु.

व्याख्यानकर्तारः श्रीसुरेश्वराचार्याः प्रमाणीकृतोपदेशसाहस्रीतः वार्तिकद्वयतश्च श्लोकान् समुद्धृत्य वार्तिकप्रस्थानविशुद्धसंप्रदायमाविरकार्षुः। सत्वरं जिज्ञासुभिरवलोकनीया व्याख्येयम्।

**१८. वेदांतप्रक्रियाप्रत्यभिज्ञा (१९६४) :** १३३इ + १७ एस् +६७२ = ८२२ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विनिर्मितोऽयं स्वतन्त्रो निबन्धः। तत्रास्मिन् प्रथमे सम्पुटे सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाश्रया एकैव प्रक्रिया प्राधान्येन परिगृहीतास्ति वेदान्ताभियुक्तैरित्येतद्दर्शितमत्र। अस्याः प्रक्रियाया अनादरादेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्टमात्मैकत्वमनुभवारूढमापादयितुं नाशक्नुवन्नित्येतच्च निदर्शितम् अतिप्राचीनकालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्त विचारेतिहाससङ्क्षेपोपस्थापनेन ॥

विस्तृतांग्लभाषामयभूमिकया संस्कृतभाषामयभूमिकया च समलङ्कृतः, प्रधानविषयानुक्रमणिकासहितश्च।

**१९. वेदान्तबालबोधिनी (१९५९) :** ६ +५४ = ६० पु.

भगवत्पादविरचित प्रातःस्मरणस्तोत्रस्य प्रश्नोत्तररूपं व्याख्यानम् । भाष्यकारोक्तीनां सरणिमेवानुसृत्य वेदान्तसिद्धान्तोऽत्र जिज्ञासूनां हृदयंगमितः ।

**२०. वेदान्तडिण्डिमः (१९३५) :** १० + ८० = ९० पु.

सुप्रसिद्धमिदं प्रकरणं भावबोधिन्याख्यया व्याख्यया सहितम् । व्याख्यायां ललितया शैल्या श्रुतिप्रमाणवचनोदाहरणपूर्वकं श्लोकार्थो विवृतः । युक्त्या समुपबृंहितश्च ।

**२१. विशुद्धवेदान्तसारः (१९६८) :** १८ + ८६ = १०४ पु.

अत्र जिज्ञासुजनचित्तभूमिकाविशेषानुसारेण अनुभवप्रधानदृष्ट्या मनोदृष्ट्या इन्द्रियप्रधानदृष्ट्या चेति वेदान्तोपदेशस्त्रेधा विभज्य प्रदर्शितः ।

**२२. विशुद्धवेदान्तपरिभाषा (१९६९) :** ८इ + ८एस् +१३० = १४६ पु.

ब्रह्म, जगत्, जीव इति पदार्थत्रयस्य सतत्त्वम्, जगद्ब्रह्मणोः जीवब्रह्मणोश्च संबन्धश्च साम्प्रदायिकपरिभाषाजातमवलम्ब्य अत्र निरूपितः ।

**२३. शाङ्करं वेदान्तमीमांसाभाष्यम् (१९७४) (स्वयं व्याख्यातम्) :**
१६ + १०५ = १२१ पु.

**२४. वेदान्तविद्वद्गोष्ठी (१९६२) :** ३१इ + ३५ एस् + ९८ = १६४ पु.

शाङ्करभाष्यतद्व्याख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्य एकादशानां विद्वत्प्रकाण्डानामभिप्रायाः अत्र दत्ताः । विद्वदभिप्रायसंग्राहिका आंग्लभूमिका - विभूषितश्च ।

**२५. पञ्चपादिकाप्रस्थानम् (१९६६) :** १३इ + २१एस् + १७१ = २०५ पु.

अत्र पञ्चपादिकाप्रस्थानं भाष्यप्रस्थानेन तुलितमस्ति ; येनावलोकितेनेदं निश्चीयेत यत् सर्वथापि प्रस्थानान्तरमेवावलम्बितं पञ्चपादिकाकारैः, भाष्याक्षराणि तत्र तत्रान्यथायोजनेन स्वाभ्युपगतप्रमेयपराणीव वाक्यानि नीतानि चेति ।

**२६. श्रीशङ्करहृदयम् (१९२९) :** ★★★ ३६ + २३८ - २७३ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिः पूर्वाश्रमे विनिर्मितं प्रकरणमिदं पूज्यपादानां श्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियारहस्यभेदकानां गभीराशयं विवृणोति । सर्वत्र

चात्र प्रमाणवाक्यान्युदाहृतानि । परःशतम् श्रीमद्भाष्यकृतां तत्साक्षादन्तेवासिनां श्रीसुरेश्वराचार्याणां सुप्रसिद्धमाण्डूक्यकारिकाकृतां श्रीगौडपादाचार्याणां च । अनुशाङ्करवेदान्तिभिः संप्रदायविरोधेन नूत्नतया अभ्यूहितस्य औपनिषदप्रक्रिया-मलिनीकरणमूलस्य मूलाविद्यावादस्य समूलोत्पाटनरूपोऽयं निबन्धः सम्यग्दर्शनलालसजनग्राहिशुष्कतर्कपिशाचोच्चाटने महामन्त्ररूपो विजयते ॥

**२७. पारमहंस्यमीमांसा (१९९४) :**　　　　१४ + १४६ = १६० पु.

संन्यासाश्रमः कथं शास्त्रेण विहितः, संन्यासस्य प्रकाराः, यतीनां नित्यानि अनुष्ठेयानि, संन्यासिनां मुख्यो ध्येयः, प्रणवचिन्तनस्य प्रकाराः - इत्यादयो विषयाः - शाङ्करभाष्यं प्रमाणीकृत्य श्रुतिस्मृतिसङ्गतिपूर्वकं निरूपिता अस्मिन् प्रबन्धे । पारमहंस्यस्य वैशिष्ट्यं सम्यक् दर्शितमत्र ॥

**२८. भक्तिचन्द्रिका - नारदभक्तिसूत्राणां व्याख्या (१९९९) :**

८ + २१४ = २२२ पु.

नारदप्रणीतानां भक्तिसूत्राणां व्याख्यारूपोऽयं ग्रन्थः ॥ शाङ्करसूत्रभाष्यशैलीमनुकरोति इयं नूत्ना व्याख्या । भक्तिविषये संभावितानां सम्भाव्यमानानां सर्वेषां प्रश्नानाम् आक्षेपाणां च परिहारोऽत्र दर्शितः । भावुकैः रसिकैः अवश्यं अवलोकनीयोऽयं ग्रन्थः । कन्नड मूलग्रन्थ रचयितारः - श्री स्वामिनः, संस्कृतानुवादकः - विद्वान् वेङ्कटेशशर्मा शास्त्री, होसहल्ली । (ग्रन्थः मुद्रणे अस्ति)

----------

Phone : 0817-573820

# ABOUT KARYALAYA

(ESTABLISHED 1920)

HOLENARSIPUR (Hassan Distrit, Mysore State)

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyamata Vidya - Philosophy and Religion in its universal aspect - especially as revealed in the Upanishadsand allied literature.

1 Has so far published more than Two HUNDRED BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent Discussions, Discourses. and Public Lectures, Vedanta Classes in the morning form a regular feature.

3 Has a free lending Library and a Reading Room for the public.

4. Conducts a Kannada Monthly Magazine called the 'Adhyatma Prakasha', devoted to Jnana, Bhakti and Vairagya.

5. Maintains a Vedantic College with the object of training up model students who regard the spread of Vedantic ideas as their goal in life.



## ABOUT THE AUTHOR

His Holiness Paramahamsa Sri Sri Satchidānandendra Saraswathi Swamiji, the founder of Adhyātma Prakāśa Kāryālaya and author of over 200 reputed works on *Advaita* in Kannada, sanskrit and English blessed the earth with his presence for ninety six useful and rich years (1880-1975).

His works are characterized by vast and deep scholarship, clear and precise perception and an attractive and lively sytle. His authentic interpretation of Śaṅkara has been greatly recognized by both the East and the West. He was not just a rare and accomplished individual but a mighty and magnificient institution.

Our pranams at the holy lotus feet of Swamiji.

Om tat Sat

**ADHYATMA PRAKASHA KARYALAYA**
T. R. Nagar, Bangalore - 560 028